कसंपूजित: नमस्करणात् ३ अक्षमाला जपमाला (पक्षे) रत्नमालयपृथ्वी ४ पंचानन: (पक्षे)
चक्रेणमोहितं मर्त्वयस्य: ५ परमेश्वर: शिव: परमेश्वरोविष्णु: ६ न विद्यते आदि
र्यस्य स: पक्षे आद्यवर्णरहित: ७ सर्पभूषण: (पक्षे) पर्वतधारी गोवर्द्धनोद्धारणात् ८ भागी
रथ्या: (पक्षे) गाया पतत्रामकच्छेदो विशेषस्य ९ अगदभूषणग: (पक्षे) गदाभूषित: १०
चंद्रमौलि: (पक्षे) मयूरपिच्छेभूषित: ११ उमा पार्वती मा लक्ष्मी १२ गवीशो वृषो
वाहनं यस्य (पक्षे) आद्याक्षरस्यलोपात् वीशो गरुडोवाहनं यस्य १३ पार्वती दु:ख
नाशक: (पक्षे) गजेंद्रपीडाहारक: १४ कार्तिकेयपिता (पक्षे) मदनपिता १५ चंद्र: शिर
सि यस्य (पक्षे) मयूरपिच्छानि शिरसि यस्य १६ रावणपूजितचरणकमल: (पक्षे) को ब्र
ह्मा ईश: शिव: ताभ्यांपूजितपादपद्म: १७ शंखस्य कांतिरिव कांतिर्यस्य: (पक्षे) खप्रभ
आकाशतुल्य: सर्वव्यापकत्वात् १८ यम: (पक्षे) कुवेर: १९ गवीशो नंदी (पक्षे) वीशो गरुड
२० यमकुवेरयोशत्रुप्रति विजिगीषोगमन नंदीगरुडाख्यौ वाहनं २१ पिनाक आयुध विशे
ष: (पक्षे) नाक: स्वर्ग: ॥

© Dharmartha Trust J&K. Digitized by eGangotri

भवतिगिरिसुतायाः सार्धमेभोपियुग्मा सदृश
महसि केऽद्ययत्र सीमाविवादः ५ संग्रामे मकर
ध्वजेन मथने त्वंमोमदर्थे युग्मा नष्टं क्वेवद्धमार्ग
गामममुरो निर्लज्जवोढस्तव नामैवात्तनयस्व
भावकुटिलो हेरम्बकेऽद्यग्रहे मुंचेत्याहरुषाद्य
मद्रितनया लक्ष्मीस्तु या पातु वः ६ यौ नौ शंखवक
पालभूषणकरौ मालास्थिमालाधरौ देवौ द्वारव
तीश्मशाननिलयौ नागारिगोवाहनौ द्वित्र्यक्षौ ब
लिदक्षयज्ञमथनौ श्रीशैलजावल्लभौ पापं वो हर
तां सदा हरिहरौ श्रीवत्सगंगाधरौ ७ लोले ब्रूहि क
पालिकामिनि पिता कस्ते पतिः पातसो कः प्रत्य
ति जलादयं जननि प्रत्येति यः प्रस्तरात् इत्यं पर्व
तसिन्धुराजसुतयोराकर्ण्य वाक्यान्तरीं संसेरस्य
हरेर्हरस्य च मुदो निर्यन्तु विघ्नं तु वः ८ यस्मादासी
त्कुमारा कुवलयदलव ल्लीलयोद्दाहगंगौ वामा
यस्यांगसेवापिहितजननचयो योगवीशधन्योपि
लेके शाघेकनाथो हिमकररुचिविम्बद्युविशेषश्च
मोसौ वर्णाश्रयस्यपादपद्मद्वन्द्वहारिः पातकं
वः स्मरारिः ९

त्रिमूर्तयः ॥

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने गुणत्र
यविभागाय पश्चाद्भेदमुपेयुषे १

२२ शिवपते मदनेन विस्मयपदे समुद्देश १३ विनाशः पदे विलोड्ने १४ नंदी
गंगामित्यर्थः पदे वरपाम कंसस्य कुब्जादासीमित्यर्थः १५ हम्बकेव नील
कंठ ग्रह निर्वेधं मुंचः पदे हम्बके ग्रहे मत्कंठग्रहं मुंच १६ पाषाणात् पा
षाणाः पर्वतगर्भसंजननत्वात् १७ स्त्री पदे मा लक्ष्मीः १८ वेद्रः पदे मीनाः।

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰ रभा १

17

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते अथ विश्वस्य
संहर्त्रे तुभ्यं त्रेधास्थितात्मने २ रजोजुषे जन्मनि सत्त्व-
वृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे अजाय सर्ग-
स्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने न-
मः ३ यथामश्वेतारुणाकृष्णजलयवणिपयोत्फुल्ल-
पङ्केरुहस्था सोमासोमाविष्णुपितामहश्चवरणापिना
कोऽग्रेऽङ्कारशास्त्राः देवाह्निमष्ठनेशाजगदवनस-
मुच्छेदनोन्मतिदत्ताः प्रीताः वः पान्तुनित्यं हरिहर
विधयस्ताः स्वगोहंसपत्राः ४

विष्णुः ॥

आदिमध्यान्तरहिते दशाहीने पुरातनम् अद्वि-
तीयमहं वन्दे मत्स्यसदृशं हरिम् १ जयति स
भगवान्कूर्मः शेते यः शेषभोगशय्यायाम् मथ्ये
पयः पयोधेरपरश्चाम्भोनिधिः कूर्मः २ अतिवि-
पुलेऽकवयुगले रहसि कैरवरामस्पृशन्नकूलेस्याः
तदपहृते निजहृदये जयति हरिर्मृग्यमाण इव
३ जयति सनाभिर्जगतां सनाभिरम्भोरुहभवजग-
दीनः दामोदरो निजोदरगह्वरनिर्विष्टजगदण्डः
४ श्रीकरपिहितेचक्षुः स्वाद्यपत्रं वः पुण्डरीकन-
यनस्य नयनमिवेतिनामागतमब्जनिभं नाभिस-
रिरेण ५

१ मा लक्ष्मीः उमा पार्वती २ चक्रम् ३ गरुड ४ वस्त्रस्य प्रान्तभागस्याः सू-
त्रवर्तिकाः ५

© Dharmartha Trust J&K. Digitized by eGangotri

श्यामे श्रीकुचकुङ्कुमपिञ्जरितमुरो मुरद्विषो ज
यति दिनमुखनभ इव कौसुम्भविभाकरोपहि
भूषयति ६ प्रतिबिम्बितप्रियातनुसकौस्तुभे
जयति मधुभिदो वक्षः पुरुषायितमभ्यस्यति
लक्ष्मीर्यद्दीप्यमुकुरमिव ७ केलिचलाङ्गुलिल
म्भितलक्ष्मीनाभिर्मुरद्विषस्तु वरणः सजयति ये
नकृत्वा श्रीरनुरूपा पद्मनाभस्य ८ रोमावली
मुरारेः श्रीवत्सनिवेशिताग्रभागा वः उन्नाल
नाभिनलिनच्छायेवातापमपहरतु ९ श्रीधा
म्नि दुग्धोदधिपुण्डरीके यश्चञ्चरीकप्रतिमात
नोति नीलोत्पलश्यामलदेहकान्तिः सवोऽस्तु
भूत्यै भगवान्मुकुन्दः १० वक्षःस्थलीरत्नसमाज
गेते जगत्यस्तने गरुडध्वजस्य श्रियोऽङ्गरागे-
णविभाव्यते या सौभाग्यहेम्नः कषपट्टिकेव
११ जयत्युपेन्द्रः सचकारहूरन्तो विभिन्नयायः
चरणलम्भलक्ष्म्या दृष्टैव कोपारुणया रिपो
रुरः स्वयं भयाद्भिन्नमिवास्त्रपाटलम् १२

लक्ष्मीः ६ रतिरीतिवसनविहीनतया लज्जावशादिति भावः ७ पिहितेऽ
पि वक्षोगोलकेऽन्यमार्गेण पुण्डरीकनयनमुत्पादयित्वा जघनविलो
कने कृतमित्यर्थः ८ रत्नम् ९ स्त्रीकृतम् हृदालिङ्गनादिति भावः
१० प्रातःकालीननभसः स्वतो नीलिमवत्वात् ११ कौस्तुभमणिरेव सू
र्यो यस्मिन् १२ विपरीतरतम् १३ दर्पणम् १४ स्पृहा १५ चरणात्पद्म
नाभित्वेनेति भावः १६ रोमावल्या नालच्छायोत्प्रेक्षिताः श्रीवत्सेव नलिन
च्छायोत्प्रेक्षिताः १७ महासन्तापम् १८ भ्रमरः १९ निकषग्रावा

© Dharmartha Trust J&K. Digitized by eGangotri

२
सुभा
१८

18

नमामि भवं स्त्वच्चरणाम्बुजद्वये सशोणवैर्मौक्तिकैः
भिः कृतार्चनम् समस्तसामन्तकिरीटवेदिकावि
टङ्कपीठोल्लुठितारुणाङ्गुलि ३ पद्मापयोधरतटी
परिरम्भलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य
स्य अस्माकमनुरागमिव खेलदनङ्गखेदस्वेदाम्बुपू
रमनुपूरयतात्प्रियं वः ४ कचकुचचुबुकाग्रे
पाणिषु व्यापृतेषु प्रथमजलधिपुत्रीसङ्गमेऽन
ङ्गधाम्नि ग्रथितनिबिडनीवीबन्धनिर्मोचना
र्थं चतुरधिककराशः पातु वश्चक्रपाणिः ५
विरमति महाकल्पे नाभीपथैकनिकेतनस्त्रि
भुवनपुरः शिल्पी यस्य प्रतिक्षणमात्मभूः कि
मधिकरणाकीर्णस्य व्यवस्थितिरित्यसावुद
रमविशद्द्रष्टुं तस्मै जगन्निधये नमः ६ लक्ष्मी
पाणिद्वयविरचिते मूलमूर्ध्वं प्रकृतीनामव्यक्तेव
न्ते चरणकमलद्वन्द्वमाद्यस्य पुंसः यत्रैकस्य व
स्थितवति नाप्यायतो ये विनीतौ राजीसेवमाना·
त्तितरलः तालने पद्मयोनिः ७ हृत्कान्तः कम
लासने त्वद्भवनतान्ते मनाक्कृते श्रीकण्ठोऽप्य
भितः सुरानिति नतोऽस्तान्देश्याविज्ञापितः प्रेय
स्याः कृतदासने कचकृते कण्ठः कुचेत्स्रक्सहृ
स्या वामितमानसो विजयते समप्रवृद्धो हरिः ८

१ विष्णोः २ सुरतायासः ३ ब्रह्मणः पक्षे लक्ष्म्या आसने ४ वायोः
पक्षे लक्ष्म्या करणे ५

© Dharmartha Trust J&K. Digitized by eGangotri

निर्मग्नेन मयाम्भसि स्मरभराद्वालिः समालिङ्गिता
केनालीकमिदं तवाद्य कथितं राधे मुधा ताम्यसि
इत्युत्स्वप्नपरंपरासु शयने श्रुत्वा वचः शार्ङ्गिणः
सव्याजं शिथिलीकृतः कमलया कण्ठग्रहः पातु वः १८
ये शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो ह
रिः १९ येनोन्मूल्य समूलमन्दरगिरिं क्षुब्धीकृतो गा
ज्जले राज्ञ्यैन महाबलो सुररिपुः कार्यादशेषीकृतः
कृत्वा त्रीणि पदानि येन वसुधा बद्धो बलिर्लीलया
सोऽयं पातु युगे युगे युगपतिस्त्रैलोक्यनाथो हरिः २०
मुग्धे मुञ्च विषादमत्र बलभित्कम्पो गुरुस्त्यज्यतां
सद्भावं भज पुण्डरीकनयने मान्यानिमान्मानय इ
त्थं शिक्षयतः स्वयंवरविधौ पत्युर्जलेर्वाक्छलाद
न्यत्र प्रतिषिध्यमानमनिविधिं शृण्वन्हरिः पातु वः २१
नाभीपद्मवसत्स्वतन्मुखमुखोद्गीतस्तवाकर्णनप्रो
न्मीलत्कमनीयलोचनकलाविलसत्खेन्दुद्युतिः
सक्रोधं मधुकैटभौ सकरुणः स्नेहं सनामम्बुधेः
सोत्साहं समपणायं सरोजवसतिं पश्यन्हरिः पातु वः २२

शिवः पदे लक्ष्म्याः कण्ठः ६ साध्वी लक्ष्मीरित्यर्थः ७ भ्रमसमम् ८ कुर्व
सि ९ खेदम् पदे शिवम् १० बलं भिनत्तीति तम् पदे इन्द्रम् ११ बृहः
पदे बृहस्पतिः १२ सद्भावम् पदे सद्भावेन १३

© Dharmartha Trust J&K. Digitized by eGangotri

२
मुभा
१९

19

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः
कोकप्रीतिचकोरपारणपटू ज्योतिष्मती लोचने
याभ्यामर्धविबोधमुग्धमधुरश्रीरर्धनिद्रायितो ना
भीपल्वलपुण्डरीकमुकुलः कम्बोः सपत्नीकृतः १४
भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धि
नी ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्त
ये लावण्यैकमहानिधी रसिकतां लक्ष्मीदृशोस्त
न्वती युष्माकं कुरुतां भवार्तिशमने नेत्रे तनुर्वा ह
रेः १५ चत्वारः प्रथयन्तु विद्रुमलतातारकाङ्गुलिश्रे
ण्यः श्रेयः शोणसरोजकोरकरुचस्ते शार्ङ्गिणः
पाणयः भालेषु व्रजभुवां लिखन्ति युगपद्ये पुण्य
वर्णावलीः कस्तूरीमकरीः पयोधरयुगे गण्डद्व
ये च श्रियः १६ आकल्पं मुरजिन्मुखेन्दुमधुरोन्मी
लन्मन्दस्मितमाधुरीपीयोदानमनोहरः स्रवयतां वो
पाञ्चजन्यध्वनिः लीलालङ्घितमेघनादविभ
वो यः कुम्भकर्णव्यथादायी दानवदन्तिनो द
शमुखविक्रमाक्रामति १७ भ्राम्यन्मन्दरकन्द
रोदरदरीव्याहतिभिर्वारिधेः कल्लोलैरलमाकुले
कलयतो लक्ष्म्या मुखाम्भोरुहम् श्रोतस्कान्तर
लाः स्मराद्धिकसिताभीमांससमाकुञ्चिताः कोपे
नाजल्पितामदाम्भकलिताः शौरेर्दृशः पान्तु वः १८

कमललोचने पद्ये विशेषो १४ शार्ङ्गिणस्य १५ भक्तिप्रह्वादिविशेषणानि नेत्र
पद्ये तनुपदेन योज्यानि १ प्रसन्नः २

© Dharmartha Trust J&K. Digitized by eGangotri

पर्यङ्कीकृतनागनायकफणाश्रेणीमणीनां गणे
संक्रान्तप्रतिबिम्बसंवलनया विभ्रद्वपुर्विक्रियाम्
पादाम्भोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः श-
तैः कायव्यूहमिवाचरन्नुपचिताकूतो हरिः पातु वः २१
प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभा-
णामात्मव्यापारगुर्वी जनितजललवा जृम्भितैः सा-
ङ्गभङ्गैः नागाङ्कं मोक्तुमिच्छोः शयनमुरुफणाचक्र-
वालोपधाने निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृ-
ष्टिराकेकरा वः २ श्रीराजीवात वक्षःस्थलनिलय-
रमाहस्तवास्तव्यलोलल्लीलाब्जान्तः सरन्तो मधुर-
मधुसरीनाभिपद्मे मुरारेः ब्रह्मा लोके लोकमाता हि
युगमखवशिशोराननेष्वर्च्यमाणे शङ्खप्रान्तेन दि-
व्यमय इति विबुधैः शङ्क्यमाना पुनातु ३ गरुड-
सौवर्णाङ्घ्रिः नयनरामारुततन्नाहिव्रातकान्ताकच-
स्खजन्मौक्तिकभूषणः खगपतिः पूर्णेन्दुबिम्बान-
नः यस्याधीश्वरपादपद्मयुगलस्पर्शामलाङ्गाननः
पायादहो विनतासुतो हरिकृपालोकैकपात्रीकृतः २२

लक्ष्मीः ॥

जयति जगतो मातुः स्तनकुङ्कुमबिन्दवः मुक्ता-
त्वाविषसंक्रान्तकौस्तुभश्रीविडम्बिनः १ पायात्स
योपिङ्होहितः कपोलामलचन्द्रमाः यत्रसंक्रान्तबिम्बे-
नहारिणा हरणापितम् २

अदतपरपुत्रिकाप्रार्थकत्वेन ३ संवद्ध ४ बद्धशरीरताम् ५ समस्तकाम-
भावः ६ उन्मीलनम् ७ पुटविदारणाम् ८ शेषशिरःस्थानमित्यर्थः ९ शेष
नागक्रोडरूपम् १० ब्रह्मन् ११ मण्डल १२ ईषत्संकुचिता १३ वक्र १४ अरुणः १५

© Dharmartha Trust J&K. Digitized by eGangotri

र
लभा
२०

20

देवैःर्पितचरणाम्हजिवङ्मायेवहृतिकैटभीङ्पं
जयतिस्मरास्मरहृस्मितालज्जाजितेलक्षणालक्ष्मीः
तल्पीकृताहिरगणितगरुडेहाराभिहृतविधि
जेयति फणशतपतिस्थासोरागान्यायाः श्रियः
केलिः ४ स्मेराननेनहृरिणासस्हृमाकारवेदे
नाकलितम् जयतिगुरुबाधिनायाः कमलायाः
कैटभीध्यानम् ५ कमलासनकमलेक्षणकमला
रिकिरीटकमलस्पृहाहेः नतपदकमलाकमला
करधृतकमलाकरोतुमेकमलम् ६ दन्तैः कोर
किताम्मितैर्विकासिताभ्रूविभ्रमैः पवित्रतादोष्णीप
ल्लविताननैः कुसुमितालीलाभिरुद्वेलिता उत्तुङ्ग
स्तनमण्डलेनफलिताभक्ताभिलाषैर्हिता काचि
त्कल्पलतामरामरवनतायायान्नयायाः स्मृता ७
उत्तुङ्गस्तनमण्डलोपरिलसन्मालम्बमुक्तामणे
रन्तर्बिम्बितमिन्द्रनीलनिकरच्छायानुकारिद्युति
लज्जाव्याजमुपेत्यनम्रवदनास्पष्टम्मुरारेर्वपुः प
श्यन्तीमुदितामुदेस्तुभवतांलक्ष्मीर्विवाहोत्सवे ८
प्राप्तानेहसितेपितामहशतेत्रस्तेकपालीतिच
व्याहृतेगुरुविस्मयेदहनरम्याविकृताभीरुता यो
लोमीपतिरित्यसंपितमयक्षौमाविनम्रश्रियापा ९
यात्ः पुरुषोत्तमोऽयमितियोन्यस्तः सपुष्पाञ्जलि
र्लीलाभिनहिरण्यगर्भकरतरेरक्तात्मनावस्थिता
हरिणाऽवाचरितम्

© Dharmartha Trust J&K. Digitized by eGangotri

न्तोरेहारमुदारकुङ्कुमरसानद्यानभद्यानखेः ।
वीरश्रीकुचकुङ्कुमसौलिलिखितो वीरस्यपत्रावलीस्त
त्कालोचितभाववन्मधुरेमन्दस्मितेपातुवः ११
पायाद्गन्नानासिनाम्बूनदगिरिशिखरेकान्तिरिन्दोः
कलानामिन्दोन्नकेनपयोभिनमधुरमुखाम्भो
रुहेभूषमाणो लीलादोलायमानश्रुतिकमलमि
लभृङ्गसङ्गीतसाक्षी पायादम्भोधिजायाःकुसुम
शरकलानाटनान्दीनकारः ११ इतिप्रत्याहारनान्ते
भरमुरगपतेर्याणिनैकेनकृत्वा धृत्वाचान्येन
वासोविगलितकबरीभारमंसेवहन्त्याः भूयस्त
त्कालकान्तिद्विगुणितसुरतप्रीतिनाशौरिणावः
शय्यामालिङ्ग्यनीतंवपुरलसलसद्बाहुलक्ष्म्याः पु
नातु १२

ब्रह्मा ॥

तंवन्देपद्मसद्मानमुपवीतच्छटाछलात् गङ्गा
स्रोतस्त्रयेणेव यः सदैवनिषेव्यते १ कृतकान्त
केलिकृतकश्रीशीतश्वाससेकानिशाम्णः वेवित
वितताविरुतोनाभिसरोजेविधिर्जयति २

दशावताराः ॥

वेदानुद्धरतेजगन्निवहतेभूलोकमुद्बिभ्रते दैत्यं
दारयतेबलिंछलयतेक्षत्रक्षयंकुर्वते पौलस्त्य
जयतेहलंकलयतेकारुण्यमातन्वते म्लेच्छान्
मूर्छयतेदशाकृतिकृतेकृष्णायतुभ्यंनमः १

१ लाङ्गलम् २

२
भोम
२१

21

यस्मालोपितशल्कसीम्निजलधिः पृष्ठेजगन्मण्ड
ले दंष्ट्रायां धरणीनखेदितिसुतार्धीशः पदेरोद
सी क्रोधेक्षत्रगणः शरेदशमुखः पाणौप्रलम्बा
सुरो ध्यानेविश्वमसावधार्मिककुलं कस्मैचिदस्मै
नमः १ पाठीनः कमठः किटिर्नरहरिः खर्वाकृ
तिर्भार्गवो रामः कंसनिषूदनोदशबलः कल्की
चनारायणः युष्माकं सविभूतयेस्तुभगवान्से
तुर्भवाम्भोनिधावुत्तारायपुगेयुगेयुगपतिस्तै
लोक्यनाथोहरिः २ वेदायेनसमुद्धृतावसुमती
पृष्ठेधृताप्युद्धृता दैत्येशोनखैर्हतः फणिपते
र्लोकेबलिः स्थापितः स्नातंयानगतोदशास्यर
हितामातान्कृतारोहिणी हिंसादोषवतीयताध्य
यवनायायात्सनारायणः ३ मत्स्यः सग्रमेरोप
ततितपनेतोयविन्दाविवेन्दावनलीनेजलधि
सलिलेव्याकुलेदेवलोके मात्स्यंरूपंसमुद्धृत
ताकृष्यनिर्मुक्तवार्धिश्रीकान्तस्यस्खलज्जलगते
वेमलत्स्पन्दनात् ४ विपत्कष्टानलोच्छलितज
लगर्भेनिपिपासामयोनाथः पाथः पृथुलनवडः
स्तोविपदम्भूत निधिमासामैवोदिनपतिरभूद्रो
वेदद्रुनसुलन्कायेयाश्चिन्मजयतिहरिर्मीनवपु
षा ९

धारयते १ तक ४ प्राणे ५ मत्स्यः ६ वराहः ७ बुद्धः [illegible] १ वन्हः ११ उदक
म १२ विपुलः १४ दरिद्रः १५ सूर्यः १६ वड्वानलः यदा पानीयं मीना
कृत्या भगवता स्वपुच्छेनोच्छालितं तदा सर्वमपि सामुद्रं जलं क्षिप्र
ति गतम् तत्र च रविर्वर्तित एव स वड्वानलाकृष्टाहरणेतत्पर्यः १७

मीयास्तः शकलाकृतेर्भगवतः पुच्छच्छटाच्छोटनाद्
यन्तः शतवल्गितामवरतलेतेविल्वः सैन्धवाः येष्वा
ह्रमयतद्धिरीवेशिशिरविनेस्तजोजदालेवतः यानाध्या
नवशादरोचककरुजांवकेविरायामयदम् ७ द्विस्पा
दः शकलाकृतिः सभगवान्नैः श्रेयसीसंपदे यस्य स्फू
र्जेदत्तच्छपुच्छशिखरप्रेङ्खोलनेकोऽङ्नैः स्तम्भद्वा
र्पिसमुच्छलज्जलभरैर्मन्दाकिनीसंगतेर्गङ्गासागर
संगमप्रणयिनीजातातिविह्वायः स्थली ८ मायामीन
ततोस्तनोनभवतोपुण्यानि पङ्क्तिस्थितिः पुच्छाच्छो
टसमुच्छलज्जलगुरुप्राग्भारसैकोदये: पातालाव
टमध्यसंकटतया पर्यामकप्रस्थितेर्वेदोद्धारपरा
यणस्यसततेनारायणस्यप्रभोः ९ उन्मीविल्लन
वक्रपंकजविपेईर्द्धाकृतीः सागरे लीनेच्छस्तसम
लनकृतिकरेशंखेवनवानाजिरे पुच्छोत्तिमज्जलो
कैरैः प्रतिदिशंसंतर्प्यतोवेयसे पायाद्वः समस्तणात
कोमलतनुर्मीनाभिधानोहरिः १० हेहोमीनततेनो
ह्वरे किमुदधेः किं वेपसे शोन्यतः खिन्नः किं वद वान
लाम्बलोकनः कस्मात्त्वभावादहम् इत्येसागरक
न्यकामुखशशिश्यालोकनेनापिकप्रायकामज
विह्वलनिह्नुतिपरः शौरिः शिवायास्तवः ११

समुद्रेपानीयाभावात्समुद्रस्याकाशाकल्पना तत्र च वाहवाग्नेः सूर्योपमेति
भावः ८ मत्स्याकृतेः ९ इतस्ततः आलोडनम् १० ऊर्ध्वं गच्छन्तः ११ तेजोवाग्नम १२
प्राग्निसंयोगाभावः १३ प्ररुविरोगाणाम् १४ यो निदाघजनादिरुगाक्रान्तो
वहुपानीयं पिवति तस्य पश्चात्पानीयस्यारुचिर्जायते तथैतस्य वाडवाग्नेरपी
तिभावः १५ दोला १६ आकाशस्थली यतः सागरजले मत्स्यपुच्छेनाच्छालिते
सरनद्याः सङ्गमवाप ततो गङ्गासागरसंगमतीर्थं नभस्यपि जातं इति भावः १७

र.
भोम.
२२

22

वल्गद्दिग्भ्योरुनेत्रः कमलभवभवस्फारहृष्टप्रति।
ष्ठो भास्वत्कालाग्निजिह्वः पृथुलगलगुहाहृष्टनिः
शेषविश्वः श्राद्धिः पुञ्जोत्थिताभिस्तुकितसुरवधू
नेत्रसंसृष्टविताभिर्मन्त्रशिखमाध्विवेल्लगगनतल
मलेन्तालयन्वः पुनातु ११ येन्द्रस्यामीनरूपं स्फुरद
नशिखापुच्छसेरकृनेत्रेलोलहिल्लोलकर्णाद्य।
भितजलनिधिं नीलजीमूतवर्णम् श्वासोच्छ्वासा
निलौघैः प्रचलितगगने पातिवारिं मुरारिर्दिष्टं मूढ
भूतस्थशङ्खः सभवतुभवतां मूलयेमीनरूपः १२
विस्मृष्टकेतं मगारिं किलशितदशनैः पीड्यमाने रट
न्ते हत्वातीरेपयोधेः करतलकलिते स्थापयामास
शास्त्रम् नादेनात्साभयाविश्वं प्रमुदितविबुधं येनसत्त
दैत्यं मद्वैर्दन्ताग्रैः प्रशयोनेः प्रहसितवदनः पा
तुवोरक्तवेदः १४ कूर्मः निरवधिवनिताश्रयंच
पृष्ठस्थितमानिवर्तितकौतुकप्रपञ्चम् प्रथमर
ह्यभवान्सकूर्ममूर्तिर्जयतिवनदेशालोकवल्लि
कन्दः १५ नमस्कूर्मः कूर्म नमदमरकोटीरनिक
रप्रस्पन्दिमाणिक्यछविमिलितमानिष्ठवपुषे जरी
नभ्रहिमप्रभमणिरमणीयोपशलन्हरीपदीरमस्त
नेहल्लभिरुपलालितपतिभरम् १६

अपलपनम् १४ गरिष्ठे ११ आमूलगोजातम् उल्लापरमित्यर्थः १६ सवि
स्मये इष्टाभिः १३ व्याकुलः १८ नीरन्ध्रनैः १९ वादयामास १ अवस्थान
म् २ मुकुटः ३ लोहितम् ४ अतिशयेन विकसन् ५ तरुणः ६ सूर्यः
२

© Dharmartha Trust J&K. Digitized by eGangotri

निघ्नस्य ह्यमनल्पकल्पविरतिस्त्रैलोकरत्नाग्रहः
कोशकूर्मकलेवरः स भगवान्निश्वासदम्भोम्बु
दम् कस्मान्नोदपि मथ्यमे जनवशाच्छ्वासर्पितः
सैन्धवस्पृष्टे यस्य बभूव सैकतकणव्याघेयपरिवी
तनम् ९ पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रावाग्रक
ण्डूयने निद्रालोः कमठाकृतेर्भगवतः श्वासानि
लाः पान्तु वः यत्संस्कारकलानुवर्तनवशाद्वेला
च्छलेनांभसां यातायातमतन्द्रितं जलनिधेर्नाद्या
पि विश्राम्यति १० यो धत्ते शेषनागं तदनु वसुम
तीं स्वर्गपातालयुक्तां युक्तां सर्वैः समुद्रैर्हिमगि-
रिकनकप्रस्थमुख्यैर्नगेन्द्रैः यत्त्रैलोक्यमस्या-
मृतवटसदृशो भाति वै शेमुरारेः पायादः कूर्म
देहः प्रकटितमहिमा माधवः कामरूपी ११ व
राहः हरेर्लीलावराहस्य दंष्ट्रादण्डः स पातु वः
हेमाद्रिकलशा यत्र धात्री छत्रश्रियं दधौ १२ स जय
यति महावराहो जलनिधिजठरे चिरं निमग्नो-
पि येनाद्रैरिव सह फणिगणैर्बलाद्धृता धर-
णी १३ पातु वः कपटकोलकेशवापस्यतिश्वा-
सितमारुतोद्धुता उच्छ्रितिप्रपतनैरचीक्लृपत्के
लिकन्दुकतलामिलामुहुः १४

इन्द्रशलगिरिः प्रबलवलरस्पर्शः ८ आकुञ्चनप्रसारणादि ९ पृष्ठशनि
शेषः १० तदुपरि ११ पृष्ठे १२ वराहः १३ प्रकरोतु १४

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
२२

23

नपङ्कैरलेपकलयतिपरिश्रीव्ययभयान्नमः
स्तामारेतःपुरगनगरभ्रंशभयतः नयतेवला
गःस्फुटनसहस्रोवर्धरवे महाक्रोशपायाद्दित
सकलसंकोचितमुखः २२ पान्तुश्रीशिलगान्निसं
ततमक्रूपारात्समभ्युद्धरन्पाश्रींकोलकलेवरः
सभगवान्यस्यैकदंष्ट्राङ्कुरे क्रूर्मः कन्दतिना
लतिहिरसनः पद्मन्निदिग्दन्तिनो मेरुःकोश
तिमेदिनीजलजति श्रोमापिरोलम्बति २४ पा
तुश्रीलनपद्मभङ्गिमकरीमुद्राङ्कितोरःस्थलो
देवोवःसजगत्पतिर्मधुवधूवक्त्राब्जचन्द्रोदयः
कोशकोटरतेनार्णवेन्दुविशदेदंष्ट्राङ्कुरेयस्यभू
र्भातिस्मप्रलयाब्धिपल्वलतलोत्खातैकमुस्ता
कृतिः २५ दृष्यैरमानितत्विनीजनमनःसंतोष
संकोचनःक्रूर्याद्धिघ्नमनघ्नरंसभगवान्क्रोडा
वतारोहरिः यदंष्ट्राङ्कुरकोटिकोटरकुटीको
णान्तरस्थायसौपृथ्वीभात्यवदाततेकनकदला
लीनेवभृङ्गाङ्गना २६ ब्रह्मोयस्यदिशोदलानि
विपुलःकोशःसवर्णाचलःकान्तेकेसरजा
लकर्मकिरणाभृङ्गाः पयोदावली

यथा कन्दुकः क्रीडया शिशुभिरुत्क्षिप्यते पतिष्यते च तथेयं भूरपि
स्या सवाद्यपरितोर्ध्वाधःपतनैः कन्दुकतुलां तुलयतीति भावः १४
समुद्धृत १६ कन्द इवाचरति १७ नालमिवाचरति १८ पद्मालीवाचरति
कोरक इवाचरति २० कमल इवाचरति २१ भ्रमर इवाचरति २२ यथाव
न्तो दृष्यो जाति संकोचमाप्नुवन्ति तथा हरेर्दर्शनात्मधुवधूवक्त्राम्भोरुहा
णि नितः श्रीकान्तपभवन्तीति भावः २३ ब्रह्मम् २४ निकुरम्बभवनम् २५ उज्ज्वलम्

© Dharmartha Trust J&K. Digitized by eGangotri

नालेशेषमहोरगः प्रवितते वारांनिधेर्लीलया ।
नद्धः पातु सपद्मरक्तकुवलयं क्रोडाकृतिः केशवः
११ विभ्राणोऽभिनवेन्दुकोटिकुटिले दंष्ट्राङ्कुरे ।
लीलया क्रोडाकारधरो हरिः स भगवान्भूयाद्वि-
भूतिप्रदः यस्योत्तिमवतः क्ष्माकमलिनी मालेव
मानः स्वरा तोलद्वालमृणालनालतलनां भजेभु
जङ्गेश्वरः १२ मुक्तैर्यास्यति क्रूरविद्रुममतीं दंष्ट्राङ्कु-
रश्रेयसी कर्तोत्तोभमवाप्स्यति त्रिभुवने रुद्रैरमी
भिः क्रमात् इत्यस्वल्पविकल्पमीलितमतेः कण्ठे
लुठन्तो मुहुः क्रोडाकारपरस्य कैटभजितः श्वासा-
निलाः पान्तु वः १३ लीनेऽब्धौ बैकदेशेन भसितनयन
योस्तेन सिक्तापि नष्टे श्वासग्रासोपभुक्ते मरुति ज-
लनिधौ पादरन्ध्रार्धपीते पोत्रप्रान्तैकरोमान्तर।
विवरगतां मार्गितस्त्रक्रपाणेः क्रोडाकारस्य पृथ्वीम-
कलितविभवे वैभवं वः पुनातु १४ सिन्धुषड्भावगा-
हः खुरविवरविशत्स्थानोपष्टनामः श्वासाः पाता-
लपङ्केन लुठनरुचयः पोत्रमात्रावयोगात् दंष्ट्रा-
विष्टेषु नामः श्रिखरिषु वपुनः स्कन्धकण्डूविनोदे
येनोद्धारे धरित्र्याः स जयति विभुता विघ्नितैकोऽवरा-
हः १५ नरसिंहः ॥ यत्रोः प्राणानिलाः पंचवर्णदश-
जयोः चक्रः इति कोपादिवाताम्राः पान्तु वो नृहरे।
रेनखाः १६ प्रोज्वलज्ज्वलनज्वालाविकरोरुसटाच्छ
टः

नृ॰ सभा॰ २४

24

श्वासतिमङ्गलस्माभस्मात्वानरकेसरी २३ ध्याघूत
केसरसटाविकरालवक्त्रे हस्ताग्रविस्फुरितशङ्ख
गदासिचक्रम् आविष्कृतं सपदि येन नृसिंहरूपं
नारायणेन मपि विश्वसृजं नमामि २४ वप्रदलन
संभ्रमात्स्तनरवं प्रविष्टो रिपोः क्षयात इति विस्म
यात्प्रहितलोचनः सर्वतः स्तम्भेतिकरतलाहताभि
पतिते पुरो दानवे निरीक्ष्य भुवि रेणवजयति
जातहासो हरिः २५ वरद्युतिं तव मौलिच्छमिति
वोच्छलच्छोणिते परागतिमेदसि स्फुटरवोः
स्थिनिष्ठाणिगिति पुनातु भवतो हरेरमरवैरिवीरो
रसि कृणाक्करजपञ्जरककचवर्षजन्मानलः २६
समवरमितनस्ततस्ततविदस्तहस्ताटवीनिकृ
तमरशत्रुहन्तनसिक्तवक्षःस्थलः स्फुरद्धवरा
भक्तिभिः स्थगितसमस्तदिग्गतिः समस्तनिगम
स्तुतानृहरिरस्तु नः स्वस्तये २७ वज्रवज्राग्रनखा
ग्रभेदविगलद्दैत्येन्द्रवक्षःस्तरद्रक्ताम्भस्स्फुपाट
लोद्भटसटासंभ्रान्तभीमाननः तिर्यक्काण्डकठो
रघोषघटनासर्वाङ्गखर्वीभवद्विस्मानङ्गनिरीक्षि
तो विजयते वैकुण्ठकण्ठीरवः २८ दंष्ट्रासंकटव
क्त्रकन्दरलसज्जिह्वस्य दुग्धाननालाभासुरभूरि
केसरसटाभारस्य दैत्यद्रुहः ।

वराहमुखाग्रे १ विदारणम् २ भयात् ३ नखा ४ करपत्रकम् ५ विस्ती
र्णो ६ व्याकुलो ७ रुधिरम् ८ आच्छादिता ९ सर्पः १० वेदाः ११ विदारणम् १२
सिक्ताः १३

आवलाहलवह्निशिखपकशिष्ठकोटस्थलास्फाल
नस्फारप्रस्फुटद्दन्तिपङ्क्तिजरवक्रूराननः पान्तु
वः ३९ सोमार्धायितनिष्ठिथानदशनः संस्थापिता
न्तर्गुखो वालार्कायितलोचनः स्वरयवृत्तैर्लिखायि
नमूलनः प्रत्नर्नीदनिरोधपीवरगलत्वक्पाति
पिनद्धितारस्फारसटावरूढगगनः पापान्नृसिंहः
सवः ४० विघ्नुत्स्फुरत्करालकेसरसटाभारस्य दैत्य
द्रुहः शोणाक्षैर्न्यस्ततांशरस्मरम्मनः सिंहाकृतेः शा
ङ्गिणः विस्फूर्जद्दलगार्जितर्जितककुम्भानद्रूढदर्पो
द्धयाः संरंभाः सपयन्तु वः खरनखक्षुण्णाहित
हृत्तमः ४१ दैत्यानामपि येन खाङ्कुरकुटीकोण
प्रविष्टात्मनिस्फारीभूतकरालकेसरसटासंघा
तघोराकृतेः सक्रोधं च सविस्मयं च सगुरुव्रीडं
च सान्तःस्मितं क्रोडं केसरिणो हरेर्विजयते नत
्कालमालोकितम् ४२ किं किं सिंहस्ततः किं न
रसदृशवपुर्देव चित्रं गृहीतो नैतादृक्क्वापि जी
वोऽद्भुतमुपनयमे देव संभ्रान्तचापं चापं चापं न
चापित्यहरहरहह हा कर्कशत्वेन खानामित्थं दै
त्येंद्रवक्षः खरनखमुखरैर्जिह्मितान्यः स वोऽव्या
त् ४३ भूयः कण्ठावधूतिध्वनितकरतरलोन्नमन
त्तरमालावालेन्दुत्वद्दयपादारणितदशदिशा
दन्तिचीत्कारकारी ॥

संकीर्णाः ५ उत्स्रष्टुमुत्थलम् ११ रोमकूपाः १७ रक्तीभवन् १ हिरण्यकशि
पोरुदरवृत्तस्य वाञ्छितमस्तकायः २ किं भयमिन्द्रियः ३

र
सभा
२५

25

अव्याद्वो दैत्यराजप्रथमयमपुरीयानवार्ताति
नादो नादोदितभित्तिभेदप्रसरसरभसः स्फुटक
ण्ठीरवस्य ५४ अन्तःक्रोधोज्जिहानज्वलनभव
शिखाकारजिह्वावलीढफेणौघवल्गाण्डभाण्डः
पृथुभुवनगुहागर्भगम्भीरनादः स्वच्छमारी
त्वमूर्तिर्मुरजिदवतु वः स्वप्रभामण्डलीभिः क्र
वेत्रिर्धूमधूमध्वजनिचितमिवव्योमरोमच्छटा
नाम् ५५ वामनःश्रियेदण्डहेररूर्ध्वमुक्तिमोव
लिनिग्रहे विपिविष्टरपद्मसनालदण्डोमुदेस्त
नः ५६ स्वर्वेश्रम्यविमुक्तसंपिविलमहद्वः स्फु
रत्कौस्तुभे निधनाभिसरोजकमलपुटीगभीर
सामधनि पाशावाप्तिसमुत्सुकेनबलिनासान
न्दमालोकिते पायाद्वः क्रमवर्धमानमहिमाश्चर्य
मुरारेर्वपुः ५७ स्फलशास्त्रकिणाङ्कितोः स्फुणवि
भाकिर्मीरितोरः स्थलोनाभिप्रेङ्खदलिविलोच
नयुगप्रोद्भूतशोणातपः वाहूर्मिभिन्नवह्निरेषत
हितव्यातिष्ठवाकोककेवल्तारेरध्यपनेईरब्धा
लिमनःपायाज्जगद्दामनः ५८ ब्रह्माण्डच्छत्रदण्डः
शतधृतिभवनाम्भोरुहोनालदण्डः तोणीनोक्रू
पदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ॥

३ वैः स्थापिनी ४ उमयमानः ५ सिंहः ६ अग्निः ७ वामनम् ८ आसनम् ९ यतो
हरेर्भगवतो हृदये कौस्तुभमणिर्लोहितच्छविरस्यतस्तत्प्रभाभिः कर्बु
रितत्वे वक्षःस्थलस्यापीति भावः १० यतो हरेर्नाभौ कमले वर्तते तत्तत्र
तन्त्वरभिगम्य लोलुपतया भ्रमरागमने वदनपद्मेति भावः ११ लक्ष्मी १२
शुक्रस्य १३ ब्रह्मा १४

© Dharmartha Trust J&K. Digitized by eGangotri

योनिस्त्रकालदण्डस्त्रिभुवनविजयस्तम्भदण्डो॰
ङ्घ्रिदण्डः श्रेयस्तैर्विक्रमैस्ते वितरतु विभुर्यद्विषिण्णो
कालदण्डः ४९ यस्मादाक्रामतो द्यां गरुडमणिशि
लाकेतुदण्डायमानादाश्च्योतन्त्याबभासे सुरसरि॰
दमला वैजयन्तीव कान्ता भूमिष्ठो यस्तथान्यो भुव
नगृहमहास्तंभशोभां दधानः पातामेतौ पयोजो
दरकलितनलौ पंकजातस्य पादौ ५० कस्त्वं ब्रह्म॰
न्नपूर्वः क्व च तव वसतिर्याखिला ब्रह्मसृष्टिः क्व ते
त्राता स्वनाथः क्व च तव जनको नैव तातं स्मरामि
किं ते ऽभीष्टं ददामि त्रिपदपरिमिता भूमिरल्पं किम
नेनेत्युक्तं भावगर्भं बलिमिदमवदद्वामनो वः स
पायात् ५१ परशुरामः कृत्वावत्साय समहीं द्विजे
भ्यः सपयज्ञः सोमहृषमाप्तः बभूव रुक्मसर्गं जले
समुद्राः मैत्रेणकेयः श्रियमातनोतु ५२ किं दोर्भ्यां
किमुकार्मुकेणापनिषद्दाभर्गप्रसादेन किं किं वेदा
धिगमेन भास्वति सर्गोर्वशे च किं जन्मना किं वाने
नममाउतेननयसाधीशेक्रुतान्तोऽपि चेद्विप्राणा
कृते किमप्यनुशायो रामस्य प्रस्मानवः ५३ नाशि
ष्यः किमभूद्भवः किमभवन्नाधुविशी रेणुका ना
भूद्दिस्यमकार्मुके किमिति वः प्रीणातु रामस्तथा

गुणाह्वतः ४९ नाभिसेव्यदारुदण्डः ५१ त्रिषु लोकेषु पादन्यासो यस्य तस्य ५० ज्यो
तिः शास्त्रप्रसिद्धो गगने प्रसृतरूपप उत्पातरूपो मणिकेतुः ५८ गङ्गानी
पताका ५० आरुक्तनलाविति भावः १ यदा क्षत्रियेभ्यो भूर्दत्ता तदा तेषां स्व
स्वभूमिसीमार्थे कलपवेता यवासन्निति भावः १ यदा याचकेभ्यो दाने दीय
ते तदा दानानन्तरं हस्तो हस्ते रुक्मसर्गजलं दीयते अतस्तेनैतावदानं दत्तेन समुद्रा

२ भाम २६

26

विप्राणां प्रतिमन्दिरे मणिगणोन्मिश्राणि दण्डाह
तेनाब्जीनां समदायमोऽपि महिषेणाम्भांसि नोद्धा
हितः ॥५४॥ पायाद्धो जमदग्निवंशतिलको वीरव्रता
लंकृतो रामो नाम मुनीश्वरो नृपवधे भास्वत्कुठा
राग्रयः येनाशेषहताहिताङ्गरुधिरैः संतर्पिताः पू
र्वजा भक्त्या चाश्वमखे समुद्रवसना भूर्हन्तकारी
कृता ॥५५॥ द्वारे कल्पतरुर्गृहे सुरगवी चिन्तामणी
रङ्गदे पीयूषं सरसी शुविप्रवदने विद्या सुतसौद
र्श एवं कर्तुमयं तपस्यति भृगोर्वंशावतंसो मुनिः
पायाद्वोऽखिलराजकक्षयकरो भूदेवभूषामणिः ५६
रामचन्द्रः वन्दामहे महेशानचण्डकोदण्डखण्ड
नम् जानकीहृदयानन्दचन्दनं रघुनन्दनं ॥५७॥
स्वर्णैणाजिनशयनोऽयोजितनयनो दशास्येद्वि
रभारो मुक्तरवलोकितचापः कोऽपि दुर्णयः सनी
लिमाशरणः ॥५८॥ कनकनिकषभासा सीतयालि
ङ्गिताङ्गो नवकुवलयदामश्यामवर्णाभिरामः अ
भिनव इव विद्युन्मण्डितो मेघखण्डः शमयतु
मम तापं सर्वतो रामचन्द्रः ॥५९॥

उत्सर्गजलतया भूवन्निति भावः १ यजुर्वेदविद्याज्ञानरहस्येन ४
यतो महतामनुग्रहस्तदा सफलः स्याद्युपकारः कस्य चिन्कं तं
शक्येत परं मया तत्सोऽपि निवारिता न भवत्यतः शंभुप्रसादेन
किमित्यर्थः ५ यतस्तपसा साध्यमपि साध्यते परं यदि मया तत्कर्मे
नासाधि तद्दानेन तपसा किमिति भावः ६ शत्रवः ७

© Dharmartha Trust J&K. Digitized by eGangotri

उत्फुल्लामलकोमलोत्पलदलश्यामाय रामाय मनः
कामाय प्रथमाननिर्मलगुणग्रामाय रामात्मने
योगारूढमुनीन्द्रमानससरोहंसाय संसारविध
साय स्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः ९
यो रामो न जघान वक्षसि रणे तं रावणं सायकैर्हृ
यस्य प्रतिवासरं वसति सा तस्यास्त्वहं राघवः म
य्यास्ते भुवनावली परिहृता द्वीपैः समं सप्तभिः स
श्रेयो विदधातु नस्त्रिभुवनत्राणैकचिन्तापरः २१
राज्ये येन पटान्तलग्नतृणकं त्यक्तं गुरोराज्ञया
पाथेयं परिगृह्य कार्मुकवरं घोरं वनं प्रस्थितः
स्वाधीनः शशिमौलिचापविषये प्राप्तो न वैविक्रि
यां पापाहः स विभीषणाग्रजनिहा रामाभिधानो
हरिः १० कारुण्यामृतनीरमाश्रितजनश्रीवात।
कानन्दने शार्ङ्गाख्यग्रनचापमन्दनभवाग्नीन्द्रा
दिव्यं ह्लीष्टदम् चारुस्मेरमुखोल्लसज्जनकजासौ
दामिनीशोभिते श्रीरामाम्बुदमाश्रयेऽखिलज
गत्संसारतापापहम् ११ कूर्मो मूलवदालवाल
वदपां राशिर्लतावद्दिशो मेघाः पल्लववत्प्रसू
नफलवन्नक्षत्रसूर्येन्दवः ।

ब्राह्मणेभ्यो देयत्वेन विहितेत्यर्थः ग्रासप्रमाणं भित्वा स्यादग्रं ग्रा
सचतुष्टयम् अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः ७ स्तुक
वात् ८ समूहः ९ सीता १० विभीषणस्याग्रजन्मा रावणस्तं
हन्तीति सः

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
२०

27

स्वामिन्व्योमतरुः क्रमो मम क्रियास्कुर्वन्ति गोमा
रुतेः सीतान्वेषणमादिशन्निशान्तेवा रामः सल।
ज्ञाप्रियः १४ एतौ द्वौ दशकण्ठकण्ठकदलीका
न्तारकान्तिच्छिदौ वैदेहीकुचकुम्भकुङ्कुमरजः
सान्द्रारुणाङ्काङ्कितौ लोकत्राणविधानसाधु
सवनप्रारम्भयूपौ भुजौ देयास्तामरुविक्रमौ रघु
पतेः श्रेयांसि भूयांसि वः १५ कल्याणानां निधा
नं कलिमलमथनं पावनं पावनानां पाथेयं य
न्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य विश्राम
स्थानमेकं कविवरवचसां जीवनं सज्जनानां बी
जं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम १६
कल्याणोल्लाससीमा कलयतु कुशलं कालमे
घाभिरामा काचित्साकेतधामा भवगहनगति
क्लान्तिहारिप्रणामा सौन्दर्यह्रीणकामा धृतज
नकसुतासादरापाङ्गधामा दिव्यध्यानभूमा द्वि
षिद्दभिनुता देवता रामनामा १७ योऽन्धायोद्धा
वधीनान्क्षपादिपलभुजः संपराये पराये येना
येनाश्रितानां स्त्रातिरवनमितेशानचापेन चापे
नेकान्त्वकारदत्ताकज्जभिकज्जभियः कान्तयासी
तयासीदनोरदनोः सद्वृष्टः सविभुरवतद्वः सः
सभार्यः सभार्यः १८ (सीता) [illegible]

१ रावणम् २ निखिलितम् ३ राक्षसान् ४ युद्धे ५ दर्पिष्ठाः ६ भार्गवेन ७ प्राप्तवान् ८

© Dharmartha Trust J&K. Digitized by eGangotri

उत्सङ्गेङ्कवसीम्नियत्रमकरेहृष्टाहरौलिङ्गनात्को
पोमात्तम्पुनर्लिलिखाम्बुमितिस्मरेरघूणांवरेको
पेनारुणितानास्यपातदलितःप्रेम्णाचविस्फारितो
हनोमैथिलकन्ययादिशतनःदेमेकसत्वान्कुरः ११
हनूमान् कृतकोपेयस्मिन्नमरनगरीमङ्गलर
वानवानद्धुलेकाम्समजनिवनंहृष्टतिसातिस
हासीताकान्तप्रणतिमतिविख्यातमहिमा हनूमा
नव्याद्वःकपिकुलशिरोमणरनविधिः ॥ रामक्र
मो मर्दितरावणाकेसोशरभूपसुनाविहारिरेलो
देवा श्रीपतिविघ्नमारोहरिपतिहरिकेतनप्रियो
वन्दे ॥ यःपूतनामारणलब्धकीर्तिःकाकोदरो
येनविनीतदर्पः यशोदयालङ्कृतमूर्तिरव्यात्पति
र्यहूनामथवारघूणाम् ॥ कृष्णः रन्सीवरदल
श्यामभिन्दिरानन्दकन्दलम् वन्दारुजनमन्दारं
वन्दे हंयदुनन्दनम् ॥ पान्तुवोजलदश्यामाः
शार्ङ्गज्याघातकर्कशाः त्रैलोक्यमण्डपस्तम्भाश्चत्वा
रोहरिबाहवः दर्पणार्पितमालोक्यमायास्त्रीरूप
मात्मनः आत्मन्येवानुरक्तोवःशिवंदिशतुकेशवः २१
हृदयेकौस्तुभोद्भासिहरेःपुष्णातुवःश्रियम् राधा
प्रेवशरोधायदत्तमुद्रमिवश्रिया ॥

उःस्थितमनाः ९ देवसभास्वामी १० मकरम् ११ नवसाहसा १२ अर्जुनः १३
पूतनाया मारणे लब्धा कीर्तिर्येन पक्षे पवित्रनामा रणे लब्धा कीर्ति
र्येन १४ काकोदरनामा राक्षसः पक्षे दुष्टः काकः १५ यशोदया
मात्रालङ्कृतो देहो यस्य पक्षे यशसा दयया वालङ्कृतो देहो यस्य

© Dharmartha Trust J&K. Digitized by eGangotri

र
सभा
२८

28

अवलोकितमनुमोदितमालिङ्गितमङ्गनाभि
रनुरागैः अपिहल्लीसकनर्त्तनमरकतभुजनमा
स्मामः १८ मकरीविरचनभङ्गारागयाङ्कवकलश
पीडनव्यसनी स्तनमपि शैवाङ्कभ्यवहूवधेघोद
रिजयति १९ कठिनतरदामवेष्टनलेखासेदेह
दापि नो यस्य राजन्ति वलिविभङ्गासपाण्डदामोद
रो भवतः २० विवेशविस्तुवशेलेविस्मोवपामि
निबद्धमाशिथिलभुजः भरभुग्नविनयवाङ्मौ
पेष्टहसन्हविजयति २१ नीतेन नवनवनीतेकियद्दि
तिष्टेयशोदयाक्रमः इत्यदितिगुरुजननेसमहि
करस्पृष्टभपाणयोपरः पातु २२ स्तनंधयं तेजननी
मुखाब्जेविलोकमन्दस्मितमुज्वलाङ्गम् स्पृशन्त
मगंस्तनमङ्गुलीभिर्वन्देयशोदाङ्कगतं मुकुन्दम् २३
भुजप्रभादण्डइवोर्ध्वगामीसपातु वः कंसरिपोः
कृपाणः यःपाञ्चजन्यप्रतिबिम्बभङ्ग्याधारम्भसः
फेनमिवव्यनक्ति २४ विहाय पीयूषरसंमनोक्ष
राममनाङ्घ्रिराजीवरसं पिबन्ति किम् इति स्वपाद
म्बुजपानकौतुकी स गोपबालः श्रियमातनोतु वः २५
विलिख्य सम्यक्पदवलम्भसीम्निपद्मावलिमासमि
वेणराधाम् लीलारविन्देनतयासरोषं पापाहि
दःकोःप्यभिहन्यमानः २६ क्रोधेनापरपुटेनसर
यन्तेशिकाप्रवलदह्नलिपाकिः मोहयन्निगिवन्त

© Dharmartha Trust J&K. Digitized by eGangotri

वामलोचनाः पातु कोऽपि नवनीरदच्छविः ८७ अस
सीकुसुमसोपमेयकान्तिर्यमुनातीरकदम्बमूलवर्ती
नवगोपवधूविनोदशाली वनमाली वितनोतु
मंगलं वः ८८ पुंजीभूतं प्रेम गोपाङ्गनानां मूर्तीभूतं
भागधेयं यदूनाम् एकीभूतं गुप्तवित्तं श्रुतीनां श्या
मीभूतं ब्रह्म मे सन्निधत्ताम् ८९ आनन्दमादधतमा
यतलोचनानामानीलमावलितकन्धरमात्तवंशं
आपादमामुकुटमाकलितामनोज्ञमाकारमाकल
यताममुमान्तरेनः ९० सकलभुवनवन्द्यौ वैरमि
न्द्रोः सरोजैरनुविनमितिमवायः स्वपादारविन्दे
यदपि तदमिवमायीयोजयमानेनेन्दीवरदलपुटश्या
मोमंगलेनः कृषीष्टाम् ९१ अभिनवनवनीतस्ते
यमायीतदुग्धं दधिकणपरिदिग्धं मुग्धमङ्गं मुरा
रेः दिशतु भुवनकृच्छ्रच्छेदि तापिच्छगुच्छच्छवि न
वजलधरशोभामामायद्युतिप्रतिबिम्बिताम् अमि
तमिव यमानन्दभ्रान्त्या मुहुर्मुकुरन्तिपञ्जयतिजाते
तत्रीगहासप्रियाहासितो हरिः ९२ ललितगमना
नार्यो राजन्मनोजनिताननमाः स्मरतिसदृशास्ताः स
न्त्यन्यो भवानपि तद्भवे वनभुवमितोगहादे कोन
गच्छतमां विनेमसकृदितःपुरःपिगानयमनवो
हरिः ९३

१ दुकूलम् २ गोपीपक्षे ललितं गमनं यासां ता कृष्णपक्षे ललितेन गे
गाने मनो यस्य सः ३ स्त्रियः पक्षे नाम्या यैः श्रेष्ठो यस्मात्सः ४ राजता मनोजे
न मदनेन निताता आस्यश्रीभाः कान्तिर्यासां ताः पक्षे राजन्मनोजनितः शोभमा
नमदनस्तात्तो म्लानो यस्यास्तादृशी भा यस्य स ५ शोभायमानया रम्या काम
पत्नी सदृशाः पक्षे स्मरतो रमणो योग्यः ६

२
समा
२४

29

देवः पायाम्यपासिविमलेयामुनेमज्जनीनां यावञ्जी
ना मन्दनयपदैर्वञ्चितानांपश्यकानि लज्जालोलैरस
वलितैर्हन्मिषद्भिश्च वर्णैर्गोपस्त्रीणांनयनकुसुमै
रंजितः केशवो नः ९९ शिरःस्थायोंकुसः तणाम
कृतगाथावरणायाभुजावल्लीच्छायामियमपिन
दीयप्रतिकृतो इतिक्रीडाकोपेनिभृतमुभयोर
प्यनुनयप्रसादो जीयास्तामपिगुरुसमतेष्मित
वतोः ९९ अवेमम्यापाराकलनमनरीस्पर्शमवि
गादनुन्मीलनन्तप्रकरघटनायासमसकृत
विधीदभ्याञ्चालीविपदपनयैकप्रणयिनः पदा
नोनिर्मोणपतगपतिकेतोरवतुनः ९० कपोले
पत्रालीपुलकिनि विधातुं अवसितः स्वयंश्रीरा
धायाः करकलितवर्तिमधुरिपुः अभूदृक्रेन्दो
यन्निर्हितनयनः कम्पितभुजस्तदेतत्सामथ्यं
तदभिनवरूपस्यजयति ९८ जयश्रीविन्यस्तैर्म
हितइवमन्दारकुसुमैः स्वयंसिन्दूरेणाद्विपरणा
मुद्रामुद्रितइव भुजापीडक्रीडाहतकुवलयापी
डकरिणः प्रकीर्णासृग्बिन्दुर्जयतिभुजदण्डोमु
रजितः ९९ कुपाणिवल्लघोपकेप्रमुषितेस्फुटंद्र
ष्पेनेहितीयमिदमामकेवदतिकन्दुकेकञ्चुके

सन्ति शोभनानि मुखाम्भाननानि यासांताः एते सन्त प्रशंसेषु केलिव
तरेषु मात्रः ० स्वछेः ८ स्त्राने ऊर्वलीनाम् १ वेमा वसनस्खलितदशा
हस्तयापाररहितम् २ क्रमस्य ३ विलसितैः ४ स्वजितः ५ विचितः ६

सजेतिनवगोपिकाकुचयुगभ्रमत्यनन्वलालस
मलकपंजरोनयातिगोकुलेकेशवः १० मेघै
र्मेदुरमम्बरंवनभुवः श्यामास्तमालद्रुमैर्नक्तं
भीरुरयंत्वमेवतदिमंराधेगृहंप्रापय इत्थंनद
निदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाध
वयोर्जयन्तियमुनाकूलेरहःकेलयः १ कौन्ते
यस्यसहायतोकरुणयागवाविनीतात्मनोयेनो
लंघितसंशयःकुरुपतिश्चक्रेकृतानातिथिः त्रै
लोक्यस्थितिसूत्रधारतिलकोदेवःसवःसंपदे सा
धूनामस्तुराधिनाथमथनःसोदेवकीनन्दनः २
श्रान्ताभ्रेनयनेस्फुरत्कवमरः श्वासोनविश्राम्यति
स्वेदाम्भःकणदन्तुरेनवमुखंवह्नेनसनोलस्यते
पिकोवेदमनःस्विपाशतिगिरःकष्टांप्रियांभीव
यंलस्यालल्लणकानरेत्तणायरिस्पृष्टोहरिःपा
तुवः ३ संसक्तानिवपान्तमोयनिषदयास्तरमा
धीरमानुन्माष्टवजस्त्रन्दरीकुचनटीपाटीरवे९
णानिव उन्मीलन्मरलीनिनादवद्भुतामोदोपसी
दद्दवीजिह्वालीढमलोकवल्लवशिशोःपादाम्बु
जेपान्तुवः ४ कृष्णोगोरससंचयंममन्वकुरुतेकिं
कृष्णमातःस्वमयानेनप्रकरोमिरामकिमिदंना
हंपरस्तोरतः ॥

रक्तविन्दुः ७ श्यामसितपर्णैः ८ राज्ञो ९ पकातनक्रीडाः १० पुपिष्टिरस्य
११ माधवः १२

र
सभा
३

30

किंगोविन्दवदस्मसौहलधरोमिथ्येतितोयाह्र
तोपीगोपकदम्बकेविहसयन्म्यगोमुकुन्दो
ऽवतु ५ मानस्तेणाकरत्नयाधयमुनाकच्छेन
गच्छाम्यहं कस्माद्वत्सपिनष्टिपीवरकुचद्वन्द्वे
नगोपीजनः भ्रूसंज्ञाविनिवारितोऽपिबहुशो
जल्पन्यशोदाग्रतो गोपीपाणिसरोजमुद्रितमु
खोगोपीपतिःपातुवः ६ कामिन्त्वंवदवीर्यका
रिणीकृतःकस्त्वंप्ररोचामिकः किंचैषमुषितो
स्वर्णकलशोभूपस्यकेनत्वयाकृष्णस्तःप्रकरो
तवांचलनतेकृष्णेतितन्मस्तपतामिमुकेपनबहू
वीकृष्णश्रशरत्वोपातुपीताम्बरः ७ कृष्णत्वंपटके
पठामिननुरेषमहोकिमुत्तायतेतत्वंकस्यविभो
सकस्त्रिभुवनाधीशश्चतेनापिकिम् ज्ञानेभक्ति
रथोविरक्तिरनयाकिंमुक्तिरेवास्तुनेदध्यादीनि
भजामिमातरुदितेवाक्येहरेःपातुवः ८ कृष्ण
त्वंनवयौवनोऽसिचपलाःप्रायेणगोपाङ्गनाःकं
सोभूपतिरब्जनालमृदुलग्रीवावयंगोदुहः न
द्यावेऽञ्जलिनाभवत्तमधुनावृन्दावनेमहिता
मायासीरितिगोपनन्दवचमानन्म्रोहरिःपातु
वः ९ कस्त्वंकृष्णममवेहिमोकिमिहतेमन्मन्दिरा
शंकया युक्तंतन्नवनीतभाजनपुटेन्यस्तःकिम
र्थंकरः कर्तुंतत्रपिपीलिकापनयनं सुप्ताःकि

:

© Dharmartha Trust J&K. Digitized by eGangotri

मुग्धे पिता बालावत्सगतिं विवेक्तुमिति संजल्पन्ह
रि: पातु व: १० स्वामी मुग्धतरो वनं घनमिदं बाला
हमेकाकिनी क्षोणीमावृणुते तमालमलिनच्छा
या: तम: संहति: तन्मे सुन्दर कृष्ण मुञ्च सहसा व
र्त्मेति गोप्या गिर: श्रुत्वा तां परिरभ्य मन्मथकलास
क्तो हरि: पातु व: ११ मात: किं यदुनाथ देहि चषकं।
किं तेन पातुं पय: तन्नास्त्यद्य कदास्ति तन्निशि निशा
का वान्धकारोदये आमील्याक्षियुगं निशाप्युपग
ता देहीति मातु: पुनर्वक्षोजाम्बरकर्षणोद्यतकर:
कृष्ण: स पुष्णातु न: १२ अर्धोन्मीलितलोचनस्य पि
बत: पर्याप्तमेकं स्तनं सद्य: प्रस्नुतदुग्धदिग्धमपरं
हस्तेन संमार्जत: मात्रा चाङ्गुलिलालितस्य चुबुके
स्मेरायमाणे मुखे विष्णो: क्षीरकणाम्बुधामधवला
दन्तद्युति: पातु व: १३ गच्छाम्यच्युत दर्शनेन भवत:
किं तृप्तिरुत्पद्यते किं त्वेवं विजनस्थयोर्हतजन:
संभावयत्यन्यथा इत्यामन्त्रणभङ्गिसूचितवृथा
प्रस्थानखेदालसामाश्लिष्यन्पुलकोत्कराञ्चित।
वपुर्गोपीं हरि: पातु व: १४ रामो नाम बभूव हुं तद
दबला सीतेति हुं तौ पितुर्वाचा पञ्चवटीवने निव
सतस्तामाहरद्रावण: कृष्णेनेति पुरातनीं निज
मायामाकर्ण्य मात्रेरितां सौमित्रे क्व धनुर्धनुर्धनु
रिति प्रोक्ता गिर: पान्तु व: १५
वृषबाल: ११ नगररक्षक: १ पानपात्रम् १ वानर: पद्ये कृष्ण: १

© Dharmartha Trust J&K. Digitized by eGangotri

२ सभा ३९

31

रामोनामबभूवहुंतदबलासीतेतिहुंतौपितुर्वा
चापंचवटीजनेनिवसतस्तामाहरद्रावणः कृ
ष्णेनेतिपुरातनींनिजकथामाकर्ण्यमात्रेरितां
सौमित्रेक्वधनुर्धनुर्धनुरितिव्यग्राःगिरःपान्तुवः ॥ १९
कोऽयंद्वारिहरिःप्रयाह्युपवनेशाखामृगस्यात्र
किंकृष्णोऽहंदयितेबिभेमिसुतरांकृष्णःसदहंवानरा
त् राधेःहंमधुसूदनोव्रजलतांतामेवतन्वीमलि
स्त्वेनिर्वचनीकृतोदयितयाह्रीणोहरिःपातुवः ॥१९
पीठेपीठनिषण्णबालकगलेतिष्ठन्सगोपाल ।
को यन्त्रान्तःस्थितदुग्धभाण्डमवमिघाच्छाद्यबद्धाद
रःकृत् वक्त्रोपान्तकृतांजलिःकृतशिरःकम्पंपिब
न्पयःपायाद्दागतगोपिकानयनयोर्गण्डूषफू
त्कारकृत् ॥१९ यद्येतन्नयनेस्मरामिसततेभावोभव
त्कुन्तले नीलेमुञ्चतिकिंकरोमिमहितैःक्रीतोस्मि
तेविभ्रमैः इत्युक्तमवचोनिशम्यसरुषानिर्भ ।
र्त्सितोगोपया कृष्णस्तत्परमेवतत्प्रपदिशन्कीश ।
वितःपातुवः ॥१९ दृष्टाकेशवगोपरागहृतयाकिं
चिन्नदृष्टंमयातेनात्रस्खलिताऽस्मिनाथपतितांकिं
नामनालम्बसे एकस्त्वंविषमेषुखिन्नमनसांस
र्वाबलानांगतिर्गोप्यैवंगदितःसलेशमवताद्गोष्ठे
हरिर्वश्चिरम् ॥१९ कृष्णवर्णःपक्षेकृष्णनामा १ भ्रमरःपक्षे
मधुसूदननामा २ आलम्ब्यमानोरक्तपंजरःशिकाइतिप्रसिद्धः ३ हेरामे
पक्षेवृषलूषे ४ गोपेकपिपोरागाग्रासक्तिस्तद्धृतयाःपक्षेगवां
परागेधूलिभिर्दृष्टामया ५ कृष्णाकृष्णम् पक्षेसमविषमम्

केयंभाग्यवतीनवोरसिमणीभूषेऽग्रवीणाविना
कृतास्याः प्रथमेविनाकृसहजोवर्णोमरोस्ता
दृशः स्त्रीरूपंकथमस्यालिङ्गनियमान्स्वामि
वधाकृतिंस्तुगपेवत्यतिविम्बमित्यपलपन्नाथो
हरिःपातुवः १९ योंहृष्ठायमुनानरेंगीगोपिकानिभं
वृन्दोगवोगाहने विष्णुस्नानितिनीलकंठनिवहा
योदक्षुस्तुकण्ठने३तेसापनमालपह्लवमितिछ
न्नान्तियागोपिकाः कान्तिःकालियशासनस्यव
पुषःसापावनीपातुवः २० श्रीमद्गोपवधूस्तयंग्र
हपरिषङ्केषु तक्रस्तनध्वामदोद्दलितेऽपिचन्दन
रजस्यंगेवहन्सौरभम् कश्चिज्जागरजातरागन
यनद्वन्द्वः प्रभातेश्रियं विभ्रत्कामपिवेणुनादर
सिकोजारायणीःपातुवः २१ कण्ठालिङ्गनमंग
लेवनकुचाभोगोपभोगोत्सवेश्रोणीसंगमसो
भगेवसनतेमन्त्रेयसीनांभरः प्रामंकोऽयमिती
र्ष्यायेवयमुनाकूलेवनायः स्वयंगोपीनामहर
दुकूलनिवयेकृसःसमुस्मानतः २२ कृस्रोनाम
गतेनरन्त्रमनसामूर्छतिनास्वेछयासत्यंकृस्मकि
मेषत्राहमसतीमिथ्याम्बपश्याननम् यादृशी
तिविकासितेववदनेदृष्टासमस्तंजगन्मातायः
स्यनगामविस्मयपदंपायात्सवःश्रीपतिः २४

१ पतितानाम् पक्षे पतत्रे ग्रामाम् २ विषमेषुः पञ्चशरस्तेन खिन्नमनसाम् पक्षे विषमेषु संकटेषु खिन्नमनसाम् ३ स्त्रीणाम् पक्षे बलरहितानाम् ४ समस्तवनम् ५ गोस्थानम् ६ रमणीत्वर्थः ७ वल्लभः ८

© Dharmartha Trust J&K. Digitized by eGangotri

र
सभा
३२

32

अम्बश्राम्यसितिष्ठ गोरसमहं मथ्नामि मन्था
नकं प्रालम्ब्य स्थितमीश्वरे स्मरमसंदीनाननो वा
स्त्रुकिः सासूयं कमलालयास्मरगणाः सानन्दमु
यद्वये गाढः प्रेक्षन्त पंसवोऽस्तु शिवदो गोपालबा
लो हरिः ११ कालिन्द्याः पुलिनेषु केलिकुपिताम्
त्सृज्य रासे रसं गच्छन्तीमनुगच्छतोऽश्रुकलुषां कं
सद्विषो राधिकाम् तत्पादप्रतिमानिवेशितपद
स्योद्भूतरोमोद्गतेरक्षुण्णोऽनुनयः प्रसन्नदयिता।
दृष्टस्य पुष्णातु वः १२ कंसं ध्वंसयते मुरं निरयते।
हंसं तथा हिंसते बाणं क्षीणयते बलं लवयते पी
ठं सन्धानयते भौमं त्रामयते बलाहलभिदो दै
त्यपराङ्मुखे क्लिष्टं शिष्टगणं प्रणाममवते कृ।
ष्णाय तस्मै नमः १३ रासोल्लासभरेण विभ्रमभृता
माभीरवामभ्रुवामभ्यर्णे परिरभ्य निर्भरमुरः।
प्रेमान्धपारायया साधु त्वद्वदनं सुधामयमिति
व्याहृत्य गीतस्तुतिव्याजादुद्भटचुम्बितस्मितमनो
हारी हरिः पातु वः १४ साकूतस्मितमाकुला।
कुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीक
दर्शितभुजामूलार्धदृष्टस्तनम्

विकासयन् ९ समुद्रमथने रत्नं कृतवान् मम पुनरपि स एव भयंक
रः प्रसंगः आगत इति त्रासेन १० ममसपत्नी काचिद्भविष्यतीत्य।
सूयया ११ अस्तनप्राप्तिर्भविष्यतीति धिया १२ शिरश्छेदो भविष्यतीति
बुद्ध्या १३ रागम् १४ सफलः १५ गोपिकानाम् १६ समीपम् १७ प्रकटम् १८
उच्चैः कृता १९

© Dharmartha Trust J&K. Digitized by eGangotri

गोपीनांनिर्भरंतेनिरीक्ष्यललितेकांचित्स्थिरेविभ्र
यन्नन्तर्मुग्धमनोहरोहरतुवःक्लेशानवःकेशवः
२९ तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्यवंशो
च्चरद्गीतस्थानकृतावधानललनालक्षैर्नसंलक्षिताः
संमुग्धंमधुसूदनस्यमधुरेराधामुखेन्दौमृदुस्प
न्दंपल्लविताश्चिरंददतुवःक्षेमंकटाक्षोर्मयः ३०
दृष्टिव्याकुलगोकुलावनरसादुद्धृत्यगोवर्धनं वि
भ्रद्वल्लववल्लभाभिरधिकानन्दाच्चिरंचुम्बितः के
दर्पेणतदर्पिताधरतटीसिन्दूरमुद्राङ्कितोबाहु
र्गोपतनोस्तनोतुभवतांश्रेयांसिकेसिद्विषः ३१ रा
धामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली
नेपथ्योचितनीलरत्नमवनीभारावतारक्षमः स्व
च्छन्दव्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरंकंस
ध्वंसनधूमकेतुरवतुत्वांदेवकीनन्दनः ३२ किं
विश्राम्यसिकृष्णभोगिभवनेभाण्डीरभूमीरुहि
भ्रातर्यासिनदृष्टिगोचरमितःसानन्दनन्दास्पदम्
राधायावचनंतदध्वगमुखान्नन्दान्तिकेगोपतो
गोविन्दस्यजयन्तिसायमतिथिप्राशस्त्यगर्भागि
रः ३३

ज्रम्भणादिच्छलेनेत्यर्थः २० गोप्यभावम् १ तरुणाः २ उपक्रमः ३
किंचिच्चलने यथास्यात्तथा ४ इन्दुदर्शनात्तरंगा उत्तीभवन्तीति क
टाक्षाणांतरंगसाम्यमिति भावः ५ रक्षणम् ६ अनुरागः ७ नीलत्वा
द्धर्षणकर्तृत्वाच्च ८ वृन्दाटवीत्यर्थः ९ अलंकारः १० [illegible]
नार्यस्तच्छन्तीति भावः ११ कृष्णस्यासौ भोगी सर्पश्च तस्य भवने पक्षे
कृष्णस्य भोगिनः शृङ्गारिणो विलासगृहे १२ भाण्डीरनाम्नि वटवृक्षे १३

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
११

सान्द्रानन्दपुरंदरादिदिविषद्वृन्दैरमन्दादरादान
म्रैर्मुकुटेन्द्रनीलमणिभिः संदर्शितेन्दीवरम्
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥ २४
प्रातर्नीलनिचोलमच्युतमुरःसंवीतपीतांशुके
राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले
व्रीडाचञ्चलमञ्चलं नयनयो राधाय राधानने
स्वादुस्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः ॥ २५
प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्धं रणे
राधापीनपयोधरस्मरणकृत्कुम्भेन संभेदवान्
यत्र विभ्यति मीलति क्षणमपि क्षिप्रं तदालोकना
न्नाशामोहेनजितेजितंजितमभूत्क्रीडालोलकोला
हलः २६ वामः पाणिमपि स्वपंचरपरांशीशोदतीरो
दरे शं केसन्दरिकान्तकूटमपिबन्मुक्तोमरुज्जनी
पतिः रम्यं स्वं च कथाभिरन्यमनसो विक्षिप्यवामा
ञ्चले राधायाः स्तनकोरकोपरिलसन्नेत्रो हरिः पा
तु वः २७ वामांसस्थलचुम्बिकुण्डलरुचा जातानतश्री
यच्छविं वंशीगीतिभवत्त्रिभंगवपुषं भ्रूलास्यलीला
लापरम् । किं बिन्दत्तशिखण्डशेखरमतिस्निग्धा
लिनीलालकं राधादिप्रमदाशतावृतमहं वन्दे
किशोराकृतिम् २८

संगोपने कुर्वतः १४ संदर्शितइन्दीवरभ्रमोयत्र १५ नाशाय १६ वस्त्रम् १७ परिधानीकृत १८ कलहः १९ वाहने २० स्मेसति २१

© Dharmartha Trust J&K. Digitized by eGangotri

अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविस्रंसन
स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रः कुरंगीदृशां
दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां
भ्रंशः कंसरिपोर्व्यपोहयतु वो श्रेयांसि वंशीरवः ११
अस्मिन्कुञ्जे विनापि प्रचलितपवनाहतेनैकोऽपि
नूनं पप्रपामः किं नगाने समुत्सरति गणो भीतभी
तेर्भेकाणाम् तस्मिन्नाथा सखेवः सखचयन्तवि
लसल्लीलया कैटभारिर्ध्यानव्यानोन्मुखागारि प्रवल
त्तुरङ्गरागवैराग्यात्रिनारान् ५ अङ्कुल्याः कः कपा
टमहरति कुटिले माधवः किं वसन्तो नो चक्री किं
कुलालो: न हि धरणिधरः किं द्विजिह्वः फणीन्द्रः
नाहं घोराहिमर्दी किमुत खगपतिर्नो हरिः किं क
पीन्द्र इत्येवं सत्यभामाप्रतिवचनजितः पातु वश्च
क्रपाणि ५ वृन्दारण्ये चरन्तीं विधुरपि सततं भ्रू
भङ्गैः स्पृशन्ती नन्दात्मनाव्यनादिः शिशुरपि नि
गमैर्लालितावीक्षिताऽपि विश्लेषे भावनाह्लादम
दमलमहाम्भोदसच्छायकाया मायापायाय दद्या
यादविहितमहिमा कापि पैताम्बरी वः ५२
रुक्मिणी साध्याशेषतनुः सदर्शनकरः सर्वाङ्गली
लाजितत्रैलोक्याचरणारविन्दललितेनाक्रान्त
लोको हरिः।

व्यवलः ११ साधु साधिति शिरःकम्पनम् १३ प्र
म्फितम् १४ अनिद्धो रिमर्थः १ द्वारम् १ लक्ष्मीपतिः पक्षे वसन्तः ३ च
क्रधारी पक्षे कुलालः ४ विष्णुः पक्षे शेषः ५ कमपक्षे अहिः कालियः
गरुडपक्षे अहिः सर्पः ६

© Dharmartha Trust J&K. Digitized by eGangotri

२ सभा ३४

34

विभ्राणोमुखमिन्दुमन्दरुचंचन्द्रात्मचत्वरंदयस्था
नेयांस्तननोरपश्चदयिकोमारुक्लिरसीवोऽवनात् ५२
राधा राधाभुनानुजगदुत्सुनन्दनचिन्तामम्यान
माकलयतीदयितरिक्तपात्रे यस्याःस्तनस्तबकचूचु
कलोलदृष्टिर्देवोऽपिदोहनधियापृषभेऽदोहं ५४
तथायाम्नःकान्तिस्तववदनपंकेरुहदृशौर्जिते
वम्लानत्वंवजतिसहसाप्राणदयिते वदत्येवैका
न्तेदिवसमपिविहातकुचकितानदंकेसंलग्नानवरि
शनराधाप्रियशतम् ५५ नन्दकः॥ सानन्दामृदय
ऋतनन्दकोवःसोल्लासलक्ष्मीप्रतिबिम्बगर्भःकृ
ष्णनस्येयमुनाप्रवाहसलीलराधास्मरणोमुरारेः ५६
गुरुः षट्चक्रेक्रमभावनापरिगतेहृत्पद्ममध्य।
स्थितंसंपश्यपशिवरूपिणोलयवशादात्मानमध्ये
षिनः मुक्ताकेमधुसूदनोभवपथश्रीसंभूया।
नन्देपल्लिष्टिककमलासनेकृतरुचिर्बुद्धेदेकलिङ्ग।
कृतिः ५७ नेतोरक्तमपास्यमुनिभविनोविलम्बप्र
णोदयाणपालोकेवकलेवराणिविगलतोयाईरु
न्माणिपःमायाजालनियामितानिहृणयानोन्मी
लयन्तिस्तिणीनिर्व्याजप्रणिधाननिश्चलमतिर्गुप्ये
सगुरोःस्तवः ५८

विस: पद्ये वा नरः १ आधारचक्रं मणिपूरचक्रमधिष्ठानचक्रमाज्ञाचक्रं
विन्दुचक्रं लयचक्रं चेति षट्चक्राणि २ परिपाटी ३ वासना १० आ
सम् ११ विवेकाग्रवशात् १२ स्थितः १२ जङ्घायामध्यभागेन संश्ले
षो यत्र जङ्घया पद्मासनमितिप्रोक्तं तदासनविवर्तते १४ ज्ञानी १५
ज्ञाने १६ संसारिणाम् १७ वहति १८

ध्यानव्याजमुपेत्यचिन्तयसिकामुन्मील्यचक्षुःक्ष
णंपश्यानङ्गशरातुरंजनमिमंत्रातापिनोरक्षसि
मिथ्याकारुणिकोऽसिनिर्घृणतरस्त्वत्तःकुतोऽन्यः
पुमाञ्शश्वन्मारवधूभिरित्यभिहितोबुद्धोजिनःपा
तुवः ४९ बध्वापद्मासनंयोनयनयुगमिदंन्यस्यना
साग्रदेशेधृत्वामूर्तौचशान्तौशमरसमिलितोब
द्धसर्पास्रवातोपशमनमनलैर्विशुद्धंकिमपिचपरमं
ज्योतिःसाकारहीनंसौख्याम्भोधौनिमग्नःसदिश
तुभवतांज्ञानवैराग्ययोऽग्र्यम् ५० कामेनाक्रम्यवा
पेहतपटुपटहेबलग्नैभिमारवीरैर्भ्रूभङ्गोत्क्षेपरू
म्भास्मितललितदृशादिव्यनारीजनेन सिद्धैःप्र
ह्वेनमाङ्गैःपुलकितवपुषाविस्मयाद्वासवेनध्याय
न्योयोगपीठादचलितइतिवःपातुदृष्टोमुनीन्द्रः ॥
कालःउद्यतकरकरवालःशकातिमिरध्वंसने
महानिपुणःकल्किहरिर्वःपापादपायतःकलि
निशान्तोम्यः ५२ प्रेङ्खद्वाजितरंगमुन्मदगजग्रा
हयगतंभटव्यावल्गत्स्फुटपुण्डरीकनिलयंरिङ्गि
त्तीरपिञ्छावलिम् म्लेच्छानीकमहार्णवंसविशु
लंसंग्रामकलावधौ यस्त्रैवाग्निरिवाभवद्धनतम
वःकल्याणिकल्कीहरिः ५३

सूर्यः ॥

चेतःसमाधिना ४९ ध्यानीरे॰ फेनपिण्डः २ खण्डयन्तु ३

© Dharmartha Trust J&K. Digitized by eGangotri

२.
सभा
२५

35

खशिशितानेत्रवंकेजालिमञ्जरञ्जनपरिगताः मसीर
नाखिलदिक्कान्ताश्रुणोशोः पान्तु भानवः १ शक
नागलविसविनश्रुणरुचः पुण्डरीकवनबन्धोः
मण्डलमुदितं वन्देकुण्डलमाखण्डलाशायाः २
प्रतिवितनगगनसरणिप्रसरणपरिमुक्तवि
श्रमानन्दः मरुदुल्लासितसौरभकमलाकरहास
कृद्रविर्जयति ३ कटुभिरपि कठोरवक्रवाकोत्व
रविरहज्वरशान्तिशीतवीर्यैः तिमिरहतमयम
हाभिरञ्जनयति जगन्नयनैव्रशुमाभानुः ४
यद्विम्बमम्बरमणिर्यदपोप्रसूतिनेकोनिषिञ्चति
यदग्निशिखास्वभासः श्रोत्रनिशास्वहिमधा
न्नि चयन्मपूखाः पूषाप्रगाणपुरुषः सनमोऽस्तु
ते ५ यो रक्तनामतिन्तरामनलोदयानादिकोऽन्ध
दारन्दहमोहनवाभवामः योषिन्नृपीपतिविश्व
नमस्तश्चराचरयादयायसमुदायं हरोरविर्नः ६
सिन्दूरस्तहपास्तशान्तिकरिणोकुम्भस्यमायोरणा
मिल्लीपल्लवशङ्कयाविचिनुतेसान्द्रद्रुमद्रोणिषु
कान्ताकुङ्कुमकाङ्क्षयाकरतलेमन्दं चलस्रेवय
तनेजः प्रथमोद्गवं भ्रमकरं सौरं विरेपात्व वः ७
नम्भागतीभक्तम्भोद्गवमिव दधतः सान्द्रसिन्दूर
रेणुरक्तेः सिक्ताइवोच्चैरुदयगिरितटीधानधारा
द्रवसा। पायाति ४ नायिकाविशेषा ५ कमलम् ६ पूर्वदिशः ७

© Dharmartha Trust J&K. Digitized by eGangotri

आयान्त्यानन्दकाले कमलवनरुचेस्त्वारुणा वो
विभूत्यै भूयासुर्भासयन्तो भुवनमभिनवा भानवो
भानवीयाः ८ भक्तिप्रह्वाय दातुं मुकुलपुटकुटी।
कोटरक्रोडलीनां लक्ष्मीमाक्रष्टुकामा इव कमल
वनोद्घाटनं कुर्वते ये कालाकारान्धकारानन पति
तज्जगत्साध्वसध्वंसकल्याः कल्याणं वः क्रियासुः।
किसलयरुचयस्ते करा भास्करस्य ९ साटोपको।
महट्टोषितरजनिवशिह्नायकोन्मकनारामुकाह्
रापहारान्तरलखगरवघोग्यिताकीर्तिशान्त्यै क
र्षतेभोजकंभोदरकुह्वरवहिर्निःसरत्षट्पदाली।
कालव्याली करेणाकलयतु दिनकृत्कल्मषोल्मू
लनं वः १० चक्रीचक्रारपङ्क्तिं हरिरपि च हरीन्धूर्जटि
र्धूर्ज्वालानसेनस्वनाख्याः रूणामपि वरुणः कू
वेरारोक्षं वेरः रंहः सङ्घः सुराणां जगदुपकृतये नि
त्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरु
चेः सोऽवतात्स्यन्दनो वः ११ किं छत्रं किं नु रत्नं तिल
कमुत तथाकुण्डलं कौस्तुभो वा चक्रं वा वारिजं वेम
मरयुवतिभिर्यद्दलिहुषिदेह्रू ऊर्ध्वमीलोलललाटे
स्त्रवसिहृद्दिकरेनाभिदेशो चरद्दंपापान्न द्वाःकेवि
स्वमत्सवदनुजनोद्गवेंयमानः क्रमेण १२

इन्दुः ८ कपालिकपदस्थानम् ९ विष्णुः १० कीलकः ११ इन्द्रः १२ अथवा
१३ यानमुख १४ चक्र १५ युगंधर १६ वेगः १७ वज्ररत्नम् १८
यतो विष्णोर्नाभिदेशे कमले वर्तते

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
३९

36

चन्द्रः ।

रविमावसते सतां क्रियायै सुधया तर्पयते सु
रान्पितॄंश्च तमसो निशि मूर्छतो विहन्त्रे हरचू
डानिहितात्मने नमस्ते १ स्वर्भानुप्रतिवारणार
मितदन्तोच्चयन्त्रोद्भवश्वभ्रालीपतयालुदीधिति
सुधासारस्रवधारधृतिः पृच्छेषामनन्तश्रियापारि
णायानस्याभिषेकोत्सवे देवः श्रामसहस्रपारकल
शश्रीरस्तु नस्तुष्टये २

पृथिवी ।

स्वर्गौकोभिरहो निवासिपुरुषारव्यातिशुद्धाश्र
रस्वाहाहाकारवषड्क्रियोऽत्यममस्तेनादीयश्रादीयते
श्राद्धाय प्रवरौ रते क्रतिजपैः सुधैर्मनुष्यैः श्रामे
दिव्यैतेयसरित्यविग्रवपुषे देव्यै पृथिव्यै नमः १

इतिश्रीसुभाषितरत्नभाण्डागारे प्र
थमे प्रकरणं समाप्तम् ॥ ॥ ॥

१ वामनाकृत्या २ गिलनम् ३ छिद्रकरणसाधनम् ४ दन्तदश
नकृतविवरपरंपरा ५ पतनशीला ६ मदनः ७ विवाहः ८
देवैः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

१- सभा १०

प्रकरणम् २ ॥

सुभाषितप्रशंसा ।

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती तस्मा
द्धि काव्यं मधुरं तस्मादपि सुभाषितम् १ सुभाषि
तेन गीतेन युवतीनां च लीलया मनो न भिद्यते
यस्य स योगी ह्यथवा पशुः २ सुभाषितमयैर्द्रव्यैः
संग्रहं न करोति यः प्रस्तावयज्ञे संग्रामे कां प्रदास्य
ति दक्षिणाम् ३ संसारकटुवृक्षस्य द्वे फले ह्यमृतो
पमे सुभाषितरसास्वादः संगतिः सुजने जने ४
सुभाषितरसास्वादजातरोमाञ्चकञ्चुकाः विना
पि कामिनीसंगं कवयः सुखमासते ५ पृथिव्यां त्री
णि रत्नानि जलमन्नं सुभाषितम् मूढैः पाषाण
खण्डेषु रत्नसंज्ञा विधीयते ६ धर्मो यशो नयो दा
क्ष्यं मनोहारि सुभाषितम् इत्यादिगुणरत्नानां संग्र
ही नावसीदति ७ संगीतमपि साहित्यं सरस्वत्याः
स्तनद्वयम् एकमापातमधुरमन्यदालोचनामृ
तम् ८ शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गानरसं फणी
साहित्यरसमाधुर्यं शंकरो वेत्ति वा न वा ९ द्राक्षा
म्लानमुखी जाता शर्करा चाश्मतां गता सुभाषित
रसस्याग्रे सुधा भीता दिवं गता १० संसदि नदेव
भूषणमुपकारकमवसरे पठनं मृग्यम् ।

१ प्रसङ्गः २ नश्यति ३ पाषाणानाम् ४

त्क्रंदयति स्ववर्णिकस्तारणामनर्घमिह यस्याः ११
कथमिह मनुष्यजन्मा संप्रविशति सदसि विबुध
गणितायाम् येन न सुभाषितामृतमाह्लादि निपी
तमास्ये: १२ अकलितशब्दालंकृतिरनुकूलास्ख
लितपदनिवेशापि अभिसारिकेव कथयति सू
क्ति: सोत्कर्षशृङ्गारा १३ आस्वादितदयिताधरसु
धारसस्येव सूक्तयो मधुरा: अकलितरसालमु
कुलेन कोकिल: कलमुदञ्चयति १४ यस्य वक्त्र
कुहरे सुभाषितं नास्ति नाप्यवसरे प्रजल्पति आग
त: सदसि धीमतामसौ लेप्यनिर्मित इवावभासते १५
सुभाषितं हारि विशत्यधो गलान्न दुर्जनस्यार्करिपो
रिवामृतम् तदेव धत्ते हृदयेन सज्जनो हरिर्महार
त्नमिवातिनिर्मलम् १६ नायं प्रयाति विकृतिं नि
रसो न य: स्यान्न क्षीयते बहुजनैर्नितरां निपीत:
जाड्यं निहन्ति रुचिमेति करोति तृप्तिं नूनं सुभाषि
तरसोऽन्यरसातिशायी १७ ॥

काञ्चनम् पक्षे सप्त पदैर्युक्तम् ५ परिगृहीतपूर्णायाम् ६ नकलिता शब्द
स्यालंकृतिर्यया अनुप्रासादिशब्दालंकृतिशून्येत्यर्थ: पक्षे अकलित:
शब्दो यया नास्यपलंकृतिर्भूषणं यस्या: शब्दभूषणवत्वे स्वस्य ज्ञानं
भविष्यतीति धियेति भाव: ७ दूतैरसप्रत्यायिका: पक्षे नायकविनानु
कूलत्ववती ८ कोमलं ललितं पदानां ग्रथनं यत्र पक्षे स्थानादस्मत्र पतनं
यथा स्यात्तथा चरणविन्यासो यस्या: ९ सुभाषितम् पक्षे शोभनोक्तिम
ती १० उत्कृष्टशालिशृङ्गाररसवती पक्षे अहमस्याः ममेति रतिपरि
तोषवती ११ मधुरम् १२ वदति १३ विले १४ पङ्क १५ राहो: १६ कौस्तुभमणि: १७
विकारम् १८ मान्द्यम् १९ अन्यरसानतिक्रम्य वर्तते इत्यर्थ: ॥

© Dharmartha Trust J&K. Digitized by eGangotri

२ सभा १८

38

किं हारैः किमु कङ्कणैः किमसमैः कर्णावतंसै
रलं केयूरैर्मणिकुण्डलैरलमलं साडम्बरैरम्ब
रैः पुंसामेकमखण्डितं पुनरिदं मन्यामहे मण्ड
नं यन्निष्पीडितपार्वणामृतकरस्यन्दोपमाः सू
क्तयः ८ हितं चापि सुभाषितेन रमते स्वीयं मनः
सर्वदा श्रुत्वान्यस्य सुभाषितं खलु मनः श्रोतुं पुन
र्वाञ्छति अज्ञाञ्ज्ञानवतोऽप्यनेन हि वशीकर्तुं स
मर्थो भवेत्कर्तव्यो हि सुभाषितस्य मनुजैरावश्य
कः संग्रहः ९

विद्याप्रशंसा ।

अपूर्वः कोऽपि कोषोऽयं विद्यते तव भारति अ
यतो वृद्धिमायाति क्षयमायाति संचयात् १ अनेकसं
शयोच्छेदि परोक्षार्थस्य दर्शकम् सर्वस्य लोचनं
शास्त्रं यस्य नास्त्यन्ध एव सः २ सर्वद्रव्येषु विद्यैव द्रव्य
माहुरनुत्तमम् अहार्यत्वादनर्घ्यत्वादक्षयत्वाच्च सर्व
दा ३ हर्तुर्न गोचरं याति दत्ता भवति विस्तृता कल्पा
न्तेऽपि न या नश्येत् किमन्यद्विद्यया समम् ४ ज्ञातिभि
र्वण्ट्यते नैव चौरेणापि न नीयते दानेनैव क्षयं या
ति विद्यारत्नं महाधनम् ५ संयोजयति विद्यैव
नीचगापि नरं सरित् समुद्रमिव दुर्धर्षं नृपं भा
ग्यमतः परम् ६ विद्या शस्त्रं च शास्त्रं च द्वे विद्ये प्रतिप
त्तये आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ७

१ कर्णभूषणैः २ वस्त्रादिभिः ३ सूर्याः ४ किरणाः ५ नास्त्युत्तमं यस्मात् ६
ज्ञानाय ७

© Dharmartha Trust J&K. Digitized by eGangotri

शुनः पुच्छमिव व्यर्थं जीवितं विद्यया विना न गुह्यगो
पने शक्तं न च दंशनिवारणे ८ सद्विद्या यदि का चि
न्ता वराकोदरपूरणे शुकोऽप्यशनमाप्नोति हरे
रामेति ब्रुवन् ९ न चोरहार्यं न च राजहार्यं न भ्रा
तृभाज्यं न च भारकारि व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् १० मातेव रक्षति पि
तेव हिते नियुङ्क्ते कान्तेव चापि रमयत्यपनीय खे
दम् लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं किं किं
न साधयति कल्पलतेव विद्या ११ विद्या नाम नर
स्य रूपमधिकं प्रच्छन्नगुप्तं धनं विद्या भोगकरी य
शःसुखकरी विद्या गुरूणां गुरुः विद्या बन्धुजनो
विदेशगमने विद्या परं दैवतं विद्या राजसु पूज्यते
न हि धनं विद्याविहीनः पशुः १२

काव्यप्रशंसा।

कान्तच्छामाः सुराः स्वर्गे निवसामो वयं भुवि किं
वा काव्यरसः स्वादुः किं वा स्वादीयसी सुधा १ निर
वद्यानि पद्यानि यद्यनार्यस्य का क्षतिः भिक्षुवक्षे
विनिक्षिप्तः किमिक्षुर्नीरसो भवेत् २ यातायान्ति
वयानाशं लोकाः शोकाधिका भुवि काव्यमेवान्वि
नी कीर्तिः स्थायिनी निरपायिनी ३ नवोऽर्थो जातिर
ग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।

मक्षिकाः ८ पुच्छकम् ९ नियोजयति १० अन्तर्हितम् ११ उत्कृष्टानि।

© Dharmartha Trust J&K. Digitized by eGangotri

२ सभा ३५

39

विकटाक्षरसेवन्यः कृन्तमेकचतुष्करम् ४ सद्भि
र्भाव्येहितेकाव्येस्याद्गर्जनगर्जनम् चाणीशाङ्गी
कृतेचन्द्रः रूंतदः किंविधुंतदः ५ नपवपदविन्या
सास्लापवार्थविभूतयः तथापिनव्यंभवतिकाव्यं
ग्रथनकौशलात् ६ सरसापिकवेर्वाणीहरिनाम
हिंतायदि सादरंगृह्यतेजनैः शुक्तिमुक्ताविना·
यथा ७ काव्यस्याम्रफलस्यापिकोमलस्येतरस्य·
च बन्धच्छायाविशेषेणरसोऽप्यन्यादृशोभवेत् ८
शास्त्रशास्त्रैवकुर्वाणसवेदानवनिर्झूतम् काव्यवि
द्याकृतिगतास्यान्स्तस्यापिजीवनी ९ स्निग्धासमभङ्गा
सद्वर्णानिर्दोषासद्गुणास्तुः नानाभंगीविलासा
वेक्ष्यतेविकृतिरन्यथा १० किंतेनकिलकाव्येनम
थमानस्ययस्यताः उदयेविवनायान्तिरसास्तनप
रेयराः ११ अथनिपदयदूपरंमदयतिहृदयेनवा
नवाश्रवणाम् काव्यमभिन्नसमायांमज्जीरकेलि
वेलायाम् १२ अविदितगुणापिसत्कवेर्भणितिः
कर्णेषुकिरतिमधुधाराम् अनधिगतपरिमला
पिहिहरतिदृशंमालतीमाला १३

१ मर्मस्पृक् २ कठिनस्येत्यर्थः ३ सर्वकालेनवसौख्यम् पक्षे सर्वेषां
रसानामानन्दम् ४ कविता पक्षे काव्यस्य शकुस्य विद्या संजीविनी
त्यर्थः ५ नानार्थशास्त्रप्रज्ञा ६ पक्षे छेदवैचित्र्यादनेकार्थपरवती ७
कविता ८ रोगः दुःखदत्वात् ९ यस्यार्थशून्यं यत्र धनिकतमं का १०
व्यं नाट्विमित्यर्थः पक्षे शिञ्जितशून्यम् १० अनुप्रासमात्रार्थं पदग्र
हः परमुत्कृष्टो यत्र पक्षे अत्यन्तवरणसंलग्नम् ११ उक्तिः १२ [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

ख्यातिं गमयति सज्जनः सकविर्विदधाति केवले
काव्यम् प्रसाति कमलमम्भोलस्यानरविर्नियोज
याते १४ कृतमल्पपदन्यासा विकचश्रीश्चारुशब्द
भङ्गवती कस्य न कम्पयते कं न रेवती गास्यमन्द
वेणी १५ सरसा सालंकारा सत्पदन्यासा सुवर्ण
मयमूर्तिः आर्या नैव भार्या न लभ्यते पुण्यहीने
न १६ सा कविता सा वनिता यस्याः श्रवणेन दर्श
नेनापि कविहृदयं विटहृदयं सरलं तरलं च सत्
वरं भवति १७ भ्रमरहिता सा कचवन्त्वीणां कव
वच्चसरसहिता लसदक्षरपीयूषाधरवल्काविं
ना महात्मनां गीयात् १८ समारोपनयोचितसम
© Dharmartha Trust J&K. Digitized by eGangotri

अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भव
ति निखिलरसायनमहितो गन्धेनोग्रेण लशुन
इव १२ दोषमपि गुणवति जने दृष्ट्वा गुणरागिणो
न खिद्यन्ते प्रीत्यैव शशिनि पतितं पश्यति लोकः क
लंकमपि १३ अन्तर्गतैर्गुणैः किं द्वित्रा अपि यत्र सा
ह्विणो विरलाः स गुणो गीतेर्यदसौ वनेवं हरिण
मपि हरति १४ गुणा गुणज्ञेषु गुणा भवन्ति ते नि
र्गुणं प्राप्य भवन्ति दोषाः सुस्वादुतोयाः प्रभवन्ति
नद्यः समुद्रमासाद्य भवन्त्यपेयाः १५ गुणेष्वेव यत्नः
पुरुषेण कार्यो न किंचिदप्राप्यतमं गुणानाम् गु
णप्रकर्षादुडुपेन शंभोरलंघ्यमुल्लंघितमुत्तमाङ्ग
म् १६ निष्कलंककलयापि जनो यः संगतः स खलु
पूज्यते जनैः भद्रपश्पजरजोऽपि पार्वतेशशेखरेण
शिरसा निशाकरः १७ वक्रोऽपि पंकिलरुहोऽपि
दुरासदोऽपि बालाश्रितोऽपि विकलोऽपि सकण्ट
कोऽपि गन्धेन बन्धुरसि केतकपुष्प जनेषु को गु
णः खलु निहन्ति समस्तदोषान् १८ गुणानाम्
ज्ञाता प्रचुरधनदातापि न मुदे मुदे विद्याज्ञाताना म
वति मितदातापि गुणिनाम् दृषोऽश्मप्रादेन न
पुनरब्धयते च चन्द्रगोदृशाः प्रान्तं दत्वा वशयति
नितान्तं पुरवधूः १९ कोऽप्येकोऽमि जने सर्वगुणसं
पन्नो दिन्नो वं गोमघामस्कृतामरसमशशाकरदं
भेकः ८ प्रुपः ९ तिमिरविषयणा १० पाषाणान ११ पेमौपिनतो योचनम
कलम् १२ कर्दमात् १३ रक्तकमलम् १४

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
११

110

काष्ठादग्निरहेः फणादपि मणिर्देवोपि गोरोम
तः प्राकाश्यं स्वगुणोदयेन गुणिनो यान्ति किं
जन्मना ५

उद्यमप्रशंसा ।

उद्योगः खलु कर्तव्यः फलं मार्जारवद्भवेत् जन्म
प्रभृति गौर्नास्ति पयः पिबति नित्यशः १ उद्यमः सा
हसं धैर्यं बुद्धिः शक्तिः पराक्रमः षडेते यत्र वर्तन्ते
तत्र देवः सहायकृत् २ उद्यमेन हि सिध्यन्ति कार्या
णि न मनोरथैः नहि सिंहस्य सुप्तस्य प्रविशन्ति
मुखे मृगाः ३ न दैवमिति संचिन्त्य त्यजेदुद्योगमा
त्मनः अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति ४
विहाय पौरुषं यो हि दैवमेवावलम्बते प्रासाद
सिंहवत्तस्य मूर्ध्नि तिष्ठन्ति वायसाः ५ पूर्वजन्म
कृतं कर्म तद्दैवमिति कथ्यते तस्मात्पुरुषकारे
ण विना दैवं न सिध्यति ६ यथा ह्येकेन चक्रेण न
रथस्य गतिर्भवेत् एवं पुरुषकारेण विना दैवं
न सिध्यति ७ यथा मृत्पिण्डतः कर्ता कुरुते यद्यदि
च्छति एवमात्मकृतं कर्म मानवः प्रतिपद्यते ८
निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः सो
द्योगं नरमायान्ति विवशाः सर्वसंपदः ९ दैवं पु
रुषकारेण साध्यसिद्धिनिबन्धनम् यो॰न्तिकर्मि
नेमिच्छेत स लोके नावसीदति १० गोरोचनम् १

प्राप्नुवन्ति २ प्रासादे देवालयशिखरे ३ सिंहस्य हतः ४ साध्यसिद्धयोर्नै
तरायतामित्यर्थः ५

© Dharmartha Trust J&K. Digitized by eGangotri

योजनानांसहस्रंतुशनैर्गच्छेत्पिपीलिका अगच्छ
न्वैनतेयोऽपिपदमेकंनगच्छति ११ कामंप्रिय
यमासाद्ययस्तुहृष्टोनचेष्टते तस्यपतिशुनश्रेयो
वीजमोक्षिकृद्रुमवत् १२ असंपाद्यतःकिंचिदर्थं
जातिक्रियागुणैः यदृच्छाशब्दवत्पुंसःसंज्ञायैजन्
मकेवलम् १३ योगिनःकरालत्वंकरोतिकमलं
तथा अनयोगिकरालत्वंकरोतिकमलाग्रजा १४
काकतालीयवत्प्राप्तंदृष्ट्वापिनिधिमग्रतः नस्वयं
दैवमादत्तेपुरुषार्थमपेक्षते १५ आलस्यंहिमनु
ष्याणांशरीरस्थोमहारिपुः नास्त्युद्यमसमोबन्धुः
कृत्वायंनावसीदति पूर्वजन्मजनितंपुराविदःक
र्मदैवमितिसंप्रचक्षते उद्यमेनतदुपार्जितंचिरा
द्दैवमुद्यमवशंनतत्कथम् १७ उद्योगिनंपुरुषसिं
हमुपैतिलक्ष्मीर्दैवंप्रधानमितिकापुरुषावद
न्ति दैवंविहायकुरुपौरुषमात्मशक्त्यायत्नेकृते
यदिनसिध्यतिकोऽत्रदोषः १८

संहतिप्रशंसा ।

संहतिःश्रेयसीपुंसांस्वकुलैरल्पकैरपि तुषेणा
पिपरित्यक्तानप्ररोहन्तितण्डुलाः १ अल्पानामपि
वस्तूनांसंहतिःकार्यसाधिकाः तृणैर्गुणत्वमापन्नै
र्बध्यन्तेमत्तदन्तिनः २

३ त्वंवधितम् ४ व्यापारंनकरोति ८ उत्तरकालेषु १ कल्याणम् ६ लक्ष्मीः ७
अलक्ष्मीः १० काकागमनमिव तालपतनमिव काकतालीयं तद्वत् प्राव
र्तितम् अकस्मादितियावत् ११ दैवो न भवति १२ पुरुषप्रयत्नः १३ कर्मनि
तपुरुषाः १४ संघातः १५ धान्यत्वक् १६

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
१११

बहूनामप्यसाराणां समवायो दुरत्ययः तृणै
र्विधीयते रज्जुर्बध्यन्ते तेन दन्तिनः २

क्षमाप्रशंसा।

क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति अतृ
णे पतितो वह्निः स्वयमेवोपशाम्यति १ नरस्या
भरणं रूपं रूपस्याभरणं गुणः गुणस्याभरणं
ज्ञानं ज्ञानस्याभरणं क्षमा २ क्षमा बलमशक्तानां
शक्तानां भूषणं क्षमा क्षमा वशीकृतिर्लोके क्ष
मया किं न सिध्यति ३

111

विनयप्रशंसा।

निष्फलो नयसि गुणमाकर्ण्य पदेऽनुगुणाय
स्यैवैषिणाम् योगिनो परिणामविमुक्तये केन
नास्ति विनयः सतां प्रियः १

सत्यप्रशंसा।

सत्यं सर्वशास्त्रार्थनिश्चितं तत्त्वशोभितम्
भूषणं सर्ववचसां लज्जेव कुलयोषिताम् १

असत्यनिन्दा।

नासत्यवादिनः सख्यं न पुण्यं न यशो भुवि दृ
श्यते नापि कल्याणं कालकूटमिवाश्नतः १
असत्यमप्रत्ययमूलकारणं कुवासनासद्म स
मृद्धिवारणम् विपन्निदानं परवञ्चनोर्जितं कृ
रतनम् १ तपोनिष्ठानाम् नापराधकृतिभिर्विवर्जितम् २
संपादयन ३ अनुकूलयन ४ संपद्यमानः ५ अपवर्गाय ६ विषये ७ भवप
नः ८ अविश्वासः ९ विपत्तेः कारणम् १०

यशो यस्माद्भस्मीभवति वनवह्नेरिव वनं निदानं दुः
खानां यदवनिरुहाणामिव जलम्। न यत्र स्याच्छा
यातप इव तपःसंयमकथा कथंचित्तं मिथ्याव
चनमभिधत्ते न मतिमान् ३ जिह्वैकैव सतामुभे
फणवतां स्रष्टुश्चतस्रस्चतस्ताः सप्तैव विभावसो
र्नियमिताः षट्कार्त्तिकेयस्य च पौलस्त्यस्य दशा।
भवन्फणिपतेर्जिह्वासहस्रद्वयं जिह्वालक्षशतानेक
कोटिनियमो नो दुर्जनानां भवेत् ४

आत्मश्लाघानिन्दा।

परैः प्रोक्ता गुणा यस्य निर्गुणोऽपि गुणी भवेत्। इन्द्रो
ऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः १ न सुखं न।
च सौभाग्यं स्वयं स्वगुणवर्णने यथैव वधुरेथीणां
स्वहस्तकुचमर्दनम् २ न सौख्यसौभाग्यकरा गुणा
नां स्वयं गृहीताः सुदृशां स्तना इव परैर्गृहीता हि
तथैव वितन्वते न तेन गृह्णाति निजं गुणं बुधाः ३ नि
जगुणगरिमा सुखाकरः स्यात्स्वयमनुवर्णयतो
सतो न तावत् निजकरकमलेन कामिनीनां कुच
कलशाकलनेन को विनोदः ४

स्वभाववर्णनम्

सर्वस्यापि हि पर्यन्ते स्वभावा नेतरे गुणाः। अतीत्य हि
गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते १

कुशलैः ११ हावाग्रैः १२ आदिकारणाम् १३ हूताणाम् १४ वह्नेः १५ सा
र्पाणाम् १६ ब्रह्मणः १७ अग्नेः १८ रावणस्य १९ शेषस्य   १

© Dharmartha Trust J&K. Digitized by eGangotri

किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् । भवा-
न्ति सुतरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः १ यः स्वभा-
वो हि यस्यास्ति स नित्यं दुरतिक्रमः । श्वा यदि क्रिय-
ते राजा तत्किं नाश्नात्युपानहम् २ परोपदेशकुशला
दृश्यन्ते बहवो जनाः । स्वभावमनुवर्तन्ते सहस्रेष-
पि दुर्लभाः ४ एकेनैकमतानां समुत्कृष्टानां परो-
पकारिणम् प्रसन्नोचनिर्दयत्वं स्वभावसिद्धं हि
त्रितयम् ५ वचो हि सत्यं परमं विभूषणं यथाङ्ग-
नायाः कृशता कटौ तथा । द्विजस्य विद्येव पुनस्त-
थाक्षमा शीलं हि सर्वस्य नरस्य भूषणम् ६ नच
मेशास्त्रपठनीतिकारणेन वापि वेदाध्ययनेन दु-
रात्मनः । स्वभाव एवात्र तथातिरिच्यते यथा प्रकृ-
त्या मधुरं गवां पयः ७ निम्नोन्नतेव स्पतिको जला-
नां चैव विभावे मृगपत्तिणां च माधुर्यमिक्षौ कटु-
तां मरीचे स्वभावतः सर्वमिदं हि सिद्धम् ८ वहि-
लस्य जलायते जलनिधिः कुल्यायते तत्क्षणान्मे-
रुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते व्या-
लो माल्यगुणायते विषरसः पीयूषवर्षायते यस्या-
ङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ९
ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः कुलस्य विनयो वित्तस्य पात्रे व्ययः

प्रतिक्रम्य १ प्रतिक्रम्य वर्तन्ते ३ नीचोत्तमम् ४ नीलगनाम् ५ कृत्रिमसर्पादिवा
वर्तते ६ सर्पः ७ माला ८ अमृतम् ९ विजृम्भते १० वाङ्नियमनम् ११

प्रकोपयत्यपसः स्वभावत्यवतोयमेस्थानियोजनता
सर्वेषामपिसर्वकारणमिदंशीलंपरंभूषणम्
काकः पद्मवनेरतिंनकुरुतेहंसोनकूपोदके मू-
र्खैः पंडितसंगमेनरमतेदासोनसिंहासने कुस्त्री
सज्जनसंगमेनरमतेनीचंजनंसेवते यायस्यप्रकृ-
तिः स्वभावजनिताकेनापिनत्यज्यते ॥ व्याघ्रः से
वतिकाननंसगहनंसिंहोगुहांसेवते हंसः सेव
तिपद्मिनींकुसुमितांगृध्रः श्मशानस्थलीम् साधुः
सेवतिसाधुमेवसततंनीचोऽपिनीचंजनंयायस्य
प्रकृतिः स्वभावजनिताकेनापिनत्यज्यते ११

वाग्वर्णनम् ।

नास्तिवाचः सभायोग्यायास्त्विताकर्षणक्षमाः सेषां
परेषांविदुषांद्विषामविदुषामपि १ गानाद्येस्त
परेपारेनोपेयायसरस्वती प्रतोनिमज्जनभयात्त
स्मौवहतिवक्त्रसि २ प्रसन्नाः कान्तिहारिण्योनाना
श्लेषविचक्षणाः भवन्तिकस्यचित्पुण्यैर्मुखेवाचो
गृहेस्त्रियः ३ वर्णैः कतिपयैरेवग्रथितस्यस्वरैरिव
अनन्तावाङ्मयस्याहोगेयस्येवविचित्रता ४ वक्तुम
पिस्वेच्छयाकामंप्रकीर्णमभिधीयते अनुज्झितार्थस
म्बन्धः प्रबन्धोदुरुदाहरः ५

सान्तिः १२ निष्कपटत्वम् १३ सत्स्वभावः १४ गानसमुद्रस्य ११ नयामवती ११ इत्ता
रूपफलम् जलतरणार्थं तुम्बाः संग्रहलोकाः कुर्वन्तीति प्रसिद्धम् १० प्रसन्नव
दनाः पते ३ नानार्थैः १९ कान्त्या शोभया मनोहारिण्यः पते आभरणगुणेन मेना
हारिण्यः १९ श्लिष्टत्वम् पते मेषः २० पौरमितैः २१ निशाहादिभिः १ स्वप्रति
भावसारेण २ पद्यग्रन्थम् ३ प्रसंगतम् ४

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
११३

113

मदीयसीमपि चनाम न लग्नगुणकल्मिनाम् प्रसा
रयन्निक्रशलाश्चिरं वाचपदीमिव ८ सर्वालेका
रगुरुक्कापिनसिष्टां वनितेव सा वाणीमनोजानन्द
रेवश्रीच्छानां न ततोनातिरि ७ मड्डलेशीतलमिष्टं
नेरीकृतपर्वतम् यथावारितयावाणीकिंनसा।
धेयनेनय ८ याकर्षति निजयोगादन्नर्गतजीव
नानिसरमानानाम् वाणीसैवगुणवनीचदीवयद्धव
भूदीव ९ रतरीतिवीनवसनाधियवस्त्राप्यिवा।
स्त्रुरसरसा प्रलसासालैङ्कनिरपिनरोचतेशाल
भजीव १० स्रवयन्नितरान रसतिपरिवयलेशोग
णाङ्कनेव श्रीःकुलकामिनीवनोन्तानिवाग्देवीजन।
मजन्मापि ११ वास्मापुर्यामामदांतिप्रियंवाकम
रुष्णाच्चापकारोःपिनष्टः किंन हृद्यकोकिलेनो।
पनीतं कोवालोकेरादभस्यापराधः १२ कामानुरो
विप्रकर्षमलक्ष्मीकीर्तिसुतेड्कृतेयाहिनस्ति नो
वाण्यनोमातरेमंगलानोपेन्द्रेयोगाः सन्ततोवावम
ङ्कः १३ विविक्रवर्णाभरणासुखश्रुतिः प्रसादय।
न्तीहृदयान्यपिद्विषाम् प्रवर्ततेनाकृतपुण्यकर्म
णांप्रसन्नगंभीरपदासरस्वती १४

इर्वेव: ५ ग्रन्तिसक्रमारातराम् पदे भन्तानराम् ६ प्रर्थ्यगुर्वीम् पदे सान्द्र
म् कदलीदलकल्मामिमर्पः ७ मेषादिभिः पदे नन्नाभिः ८ रविनाम् पदे
निर्मितनाम् ९ शाद्वादिविविराम् पदे विविरूपाम् १० शाटीमिव ११ उप
मादिभिः पदे कङ्कणादिभिः १२ मेषरहिनाः पदे आलिङ्गनरहिता १३
मनःप्रतिजानयन्नवे नन पदे कामहर्षम १४ वनरागाम् पदे प्रकर्ष
णाविपिप्रवकं विवाहितानाम् १५ हृदनानिजीवनानि पदे उदकानि १६

© Dharmartha Trust J&K. Digitized by eGangotri

केयूराणि विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला न
स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः वाण्ये
का समलंकरोति पुरुषं या संस्कृता धार्यते क्षीयन्ते
खलु भूषणानि सततं वाग्भूषणं भूषणम् १५
अस्मयापि वतः समुद्रपरिखापर्यन्तमुर्वीतले
वर्तन्तेऽपि बहवः न तत्र रसिका गोष्ठीषु सत्काव्यपाः
एकस्तत्र निरादरो भवति चेद्दुर्यो भवेत्सादरो वाग्
देवी वदनाम्बुजे वसति चेत्को नाम दीनो जनः १६
येषां कौन्दुकलाकलंकजनकाये गाढगर्वेऽज्ञया ये
वा केवलतर्ककर्कशधियः साक्षात्स्वयं श्रोत्रियाः ये
वा द्वेषमषीमलीमसधियस्ताः सा न गोष्ठीरसं शे
षं प्राज्ञ इव ग्रहान्परिहरन्वाणीं समारंकुरु १७
नष्टोऽपि षष्ठ्यंशस्वस्तिपर्यमितमण्डले सारवदैन्यहीनेन सा
भिप्रायं तुरायं समाविनयमशाठ्यविश्रमत्यातरेव वह्न
यं कोपभूभ्रमस्मितघनघनत्वादिल्पसन्देहहीनेन वा
केनू पाइमत्तः परिषदि समयेयसप्रमेयायमतम् १८

रसिकानाम् पक्षे कूपादीनाम् १७ आगन्त्वादिगुणयुक्ता पक्षे रज्जुयुक्ता १८ स्त्रीव १९
अनुप्रासोपमाद्यलंकाररहितापि २० शृङ्गारादिमती पक्षे शृङ्गाररसवती २१
आलस्ययुक्ता पक्षे रतयोः सावर्ण्येन अरसा रसभूमा २२ अलंकृतिभूतापि
पक्षे कटकङ्कणाद्यलंकृतापि २३ प्रतिमेव २४ वेश्येव २५ मनोरथान् २६ प्रदूरय
ति २७ अवलम्बीम् २८ सनाम् २९ रविविक्ताः संयोगादिना श्लिष्टाः स्फुटो वारि
ता वर्णा अक्षराणि वाभरणानि यस्याः सा पक्षे विविक्तानि शुद्धानि वर्णोरूप
माभरणानि यस्याः सा ३० सरलाकृतिः सुवर्णा यस्याः सा आद्यन्तपदः पक्षे शुद्ध
तत्पदि कृतिर्वाक्ता सरला यस्या सा मंजुभाषिणी स्पर्शः ३१ प्रसन्नानि वा वकारिणि
गंभीराणि पदानि शब्दरूपाणि वचनानि सामिद्धन्तरूपाणि यस्या सा पक्षे प्रसन्ना विमला
गंभीरा परा लसवा राग ३२ वीरभूषणानि ३३ चन्दनचन्द्रजला ३४ सुगन्धतैलादिना
संस्कृता ३५ केशाः ३६ समलङ्करोति

२
सभा
११४

114

वाग्मिप्रशंसा।

विरोधिवचसो मूकान्वागीशानपि कुर्वते जडान
प्यनुलोमार्थान्प्रवाचः कृतिनो गिरः १ तीक्ष्णा नारु
न्तुदा बुद्धिः कर्म शान्तं प्रतापवत् नोपतापि मनः
सोष्म वागेका वाग्मिनः सतः २ प्रसादरम्यमोजस्वि
गरीयो लाघवान्वितम् साकांक्षमनुपस्कारं विष्व
ग्गति निराकुलम् ३ न्यायनिर्णीतसारत्वान्निरपेक्ष
मिवागमे अप्रकम्प्यतयान्येषामाम्नायवचनोपम
म् ४ अलेख्यवाग्जनैरन्यैः स्वभिनोदत्वहर्षितम् अोर
पौरस्थ्यं संपतेः शाकैर्विमरषेरिव ५ इदमीदृग्गुणो
पेतं लब्धावसरसाधनम् आकर्ण्योत्कः प्रियं वाक्य
यो वक्ता नेदृगाशयः ६ क्रान्तिमिद्धान्तशरस्पतद्गुरु
द्धानिरुन्धतः वलितेवावरकस्य कृतिनः किं न
शोभते ७ अल्पाक्षररमणीयं यः कथयति निश्चि
तं स खलु वाग्मी बहुवचनमल्पसारं यः कथयति
विप्रलापी सः ८

१ अनुकूलवादिनः २ प्रगल्भवाचः ३ कुशलानाम् ४ अभिमानोष्मम् ५ प्रसा
दः प्रसिद्धार्थपदत्वेन रम्यम् ६ समासभूयिष्ठम् ७ अर्थभूयस्त्वपरिगत
म् न तु शब्दाडम्बरमात्रमित्यर्थः ८ विस्तरदोषरहितम् ९ आकांक्षावत्पदक
दम्बात्मकम् न तु दशदाडिमादिवाक्यवदनाकांक्षितमित्यर्थः १० अध्याहारदोष
रहितम् ११ कृत्स्नार्थप्रतिपादकम् न तु सावशेषार्थमित्यर्थः १२ असंकी
र्णार्थम् १३ न्यायेन युक्त्या निश्चितार्थत्वात् १४ स्वतन्त्रमिव १५ शास्त्रे १६
अनुमानादिभिरबाध्यत्वादप्रत्याख्याततया १७ वेदवाक्यतुल्यमित्य
र्थः १८ अनुल्लङ्घनीयत्वात् १९ ईदृशं गाम्भीर्यम् २० अग्राम्या
र्थत्वात् पत्ते योगत्वात् २१ प्रयोजनसंपन्ने पत्ते अणिमादिसमृद्धैः २२
लब्धप्राप्ते अवसरसाधने कालोपायौ येन तत् २३ याचकेन २४

© Dharmartha Trust J&K. Digitized by eGangotri

शशङ्कोस्यरविनापितालिनानिद्व्यायदिनयोनि
नाभवेत् किंतयाकरसामलिह्यरपानिह्याधनि
मतोहिमस्यया ९ भवन्तितेसम्यनमाविपश्चितोम
नोगतेवाचिनिवेशयन्तिये नयन्तितेषष्ठपपदैने
गुणगभीरमर्थकान्तिविन्यकाशतनाम् १० लवलि
गुर्वीमभिधेयसंपदंविष्णुहिमुक्रेरपरेविपश्चितः
इतिस्थितायांशनिपुरुषरुचोमुडलैभाःसर्वमतो
रमागिरः ११ पिकलावनूकसःपरमरुणयापस्य
तिहशापरापमहेषीस्वसत्वमपिनापालयतियः
तथाप्येषोऽमीषांसकलजगतांवल्लभतमोनदोषा
गमयन्तेखलमधुरवाचोक्कविद्यपि १२ आस्वाद्येव
कषायमद्रुरसमुरुषमात्रवहाशयो माकन्दस्य
यशांसिकोकिलयुवानिर्मातिदिग्भित्तिषु माधी
कानिनिपीयनस्यमधुपानतैवशनन्यमी कोद्र
नामसतामतावचवसावर्त्मानिगंवेष्टितम् १३
श्रोत्रन्नकषयतिजुवाल्स्थिरतमेऽर्थैवमीषांमनो
निर्वाप्यःपरवाच्यकृत्परहृशामेकाग्रयोनात्यक
यस्माक्राहविकम्पनःप्रबलयन्तिसतामलके
लीरश्रोत्रसुमुखमात्मनिगुणयेनसवक्रोतमः १४

वक्रः १७ चेतानिह्वाः १८ सभार्योसाधुतमा निपुणतमाः २० विद्याम् २
वाचोऽङ्कुरस्त्नीत्यर्थः २९ वक्रस्य ३० संभावितकोशलाः ३१ नियुक्तम ३२
दुर्ग्रसंपातम् ३३ सामर्थ्यम् ३४ शाठ्यस्य ३५ कोकिलः ३६ आम्रकाया
१ मुक्तानवेशानि २

२ सभा ११५ नद्धृत्रासदसिद्धवीनवचनेयद्बहुणवतोवेतसःश्रो
त्रासेरसस्फुरणंश्रवणायोरद्दोगोर्विकासश्रियम्
दविद्वाश्रमदःखकालगतिद्भुतकार्यानरपस्फुर्ति
शोकणदामनिशङ्कतोविनतुतेशोकेविरामाद।
पि ५

115

मौनम्।

आत्मनोमुखदोषेणबध्यन्तेशुकसारिकाः बकै
स्तत्रनबध्यन्तेमौनंसर्वार्थसाधनम् १ साधनम
कान्तगुणोविधात्राविनिर्मितंछादनमज्ञतायाः
विशेषतःसर्वविदांसमाजेविभूषणंमौनमपण्डि
तानाम् २ कोलाहलेकाककुलस्यजातेविराजते
कोकिलकूजितेकिम् परस्परंसंवदतांखलानां
मौनंविधेयंसततंसुधीभिः ३

स्थानमाहात्म्यम्।

नक्रः स्वस्थानमासाद्यगजेन्द्रमपिकर्षति सएव
प्रच्युतः स्थानाच्छुनापिपरिभूयते १ रक्तंविदाश्रय
संयोगाद्धत्तेशोभामसाध्वपि कान्ताविलोचनेन्य
स्तंमलीमसमिवाञ्जनम् २ स्थानस्यप्रवेशेनगु
णवानपिपीड्यते वैस्थानेशापितोदस्युःकारुके
शीमिदृश्यते ३ पदस्थितस्यपद्मस्यमित्रेवरुणभास्क
रौ पदच्युतस्यतस्यैवक्लेशदाहकरावुभौ ४

श्रवणम् नरस्यामिति यावत् ३ प्रकर्षेणोल्लासे विकासम् ४ रसानांशृ
ङ्गारादीनांस्फुरणम् ५ श्रमकार्यविस्मृतिम् ६ स्वस्याधीनम् ७ पिधानम्
मूर्खतायाः ९ सभायाम् १०

© Dharmartha Trust J&K. Digitized by eGangotri

राज्ञाङ्कलवपूर्विश्रामविन्निलस्तूपयोधराः स्थानभ्र
ष्टान शोभन्ते दन्ताः केशा नखा नराः ५ पात्रविशेषे
न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः जलमिव स
मुद्रशुक्तौ मुक्ताफलतां पयोदस्य ६ अतिमात्रभा
सुरत्वं पुष्यति भानोः परिग्रहादनलः अधिगच्छति महि
मानं चन्द्रोऽपि निशापरिगृहीतः ७ श्रायोपयकिंविद
पिशाभोमौकर्षमाश्रयान्महतः मनेभकुम्भनटग
नेमतिसृङ्गारतोभस्म ८ अस्थः शशेशास्तवीणावा
णीनरस्तनारीच पुरुषविशेषं प्राप्य भवन्ति योग्या
अयोग्याश्च ९ आश्रयवशेन सततं गुरुता च जायते
पुंसाम् विन्ध्ये विन्ध्यसमानाः करिणो वनदर्पणे
लववः १० नानाभिनागेन्द्रनवप्रभावं कण्ठस्थितो
गजेन्द्रसिंहंकरस्य स्थाने प्रयाने न बलं प्रयाने स्थाने
स्थितः कापुरुषोऽपि शूरः ११ सिंहत्वमाकरीन्द्रकुम्भ
गलितं रक्ताक्तमुक्ताफलं कान्तारे बदरीधिया द्रुतम
मगात् भिल्लस्य पत्नी मुदा पाणिभ्यामवगृह्य शुक्लक
ठिनं तद्वीक्ष्य दूरे जहाववस्थाने पततामतीव महता
मेतादृशी स्यात् गतिः १२

सत्संगतिप्रशंसा ।

महानुभावसंसर्गः कस्य नोन्नतिकारकः रथ्याम्बु
जाह्नवीसङ्गात् त्रिदशैरपि वन्द्यते १

लोहकारैः ११ कोशलम् १२ मौक्तिकत्वम् १३ मेचकस्य १४ विन्ध्यपर्वते १

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
११६

116

महाजनस्य संसर्गः कस्य नोन्नतिकारकः पद्मपत्र
स्थितं वारि धत्ते मुक्ताफलश्रियम् १ महानुभावसं
सर्गः कस्य नोन्नतिकारकः हरिहस्तगतः शंखः प
वित्रः प्रथितो भुवि २ मलयाचलगन्धेन त्विन्धनं च
न्दनायते तथा सज्जनसंगेन दुर्जनः सज्जनायते ३
इव नाल्पविलोहानां समत्वात्स्पर्शपारिणाम् यथा
लोभाच्च मूर्खो साधुदर्शनात्संगतेः सताम् ४ वीणावं
शाग्रपातन्वीन्द्रस्वस्त्रैः ऊर्ध्वो स्थितः पिवत्यनार्थं सं
योगाद्दर्कं न कंचरो यथा ५ चन्दनं शीतलं लोके च
न्दनादपि चन्द्रमाः चन्द्रचन्दनयोर्मध्ये शीतला सा
धुसंगतिः ६ साधूनां दर्शनं पुण्यं तीर्थभूता हि सा
धवः कालेन फलते तीर्थं सद्यः साधुसमागमः ७
करोति निर्मलाधारस्तुच्छस्यापि महत्त्वतां समुन्न
बिन्दुरब्धेऽपि शुक्तौ मुक्ताफलं भवेत् ८ दीयते हि
मतिस्तात हीनैः सह समागमात् समैश्च समतां
मेति विशिष्टैश्च विशिष्टतां ९ मन्दोऽप्यमन्दतां
मेति संसर्गेण विपश्चितः पंकच्छिदः फलस्येव नि
कषेणाविलं पयः १० कीटोऽपि सुमनःसंगादारो
हति सतां शिरः अश्मापि याति देवत्वं महद्भिः सुप्र
तिष्ठितः ११ काचः कांचनसंसर्गाद्धत्ते मारकतीं द्यु
तीः तथा सत्संनिधानेन मूर्खो याति प्रवीणताम् १२

देवैः २

© Dharmartha Trust J&K. Digitized by eGangotri

यद्योदयगिरौ इन्द्रः संनिकर्षेणादीप्यते नयासन्ने
निपातेन न हीनवर्णोपि दीप्यते ॥४ भुक्तिमुक्तिप्र
दे कालसमादेशनन्तरः कस्मान्नानन्दनिस्पन्दैव
र्धयति महागमः यदि सत्संगविरतो भविष्यसि
भविष्यसि तदा सज्जनगोष्ठीभुपतिष्यसि पतिष्यसि १४
सज्जनसंगो मा भूद्यदि संगो मास्तु ने पुनः स्नेहः स्ने
हो यदि मा विरहो यदि विरहो मास्तु जीवितस्याशा १०
वेशभवो गुणवानपि संगविशेषेण पूज्यते पुरुषः
नहि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमा
नम् ॥ गुरुरपि लघूपनीतो नानिमज्जति निपतमा
श्रये निहितः वानरकरोपनीतः शैलाम्भकराल ष
सेव ॥ गवाशनानां सशृणोति वाक्यम् अहं हि राज
न्ववनेमुनीनाम् नवास्य दोषो न च मद्गुणो वा सं
सर्गजा दोषगुणा भवन्ति ॥ कल्पद्रुमः कल्पितमे
व सूते सा कामधुक्कामितमेव दोग्धि चिन्तामणि
श्चिन्तितमेव दत्ते सतां हि संगः सकलं प्रसूते ॥ अ
सज्जनः सज्जनसंक्षिसंगात्करोति दुःसाध्यमपीह सा
ध्यम् पुष्पाश्रयाच्छम्भुशिरोधिरूढा पिपीलिका चु
म्बति चन्द्रबिम्बम् ॥ सत्संगाद्भवति हि साधुता खला
नां साधूनां न हि खलसंगमात्खलत्वम्

पाषाणः ३ उदयपर्वते ४ सूर्यसंनिपातेन ५ प्रकाशितो भवति ६ मूर्खः
करणे पक्षे मध्ये ७ यवनगृहस्थिते महोदरं शाकमुदिश्य मुनि
गृहस्थितस्य शाकस्योक्तिरियम् ८ कामनेयः

ग्रामेदंकृतममभवंमदेवपतेमहन्नेनहिकृतमापि
पारयन्ति २३ किंवापरेषावक्रनापरिजल्पितेनमे
सर्गापवमहतांमहतेफलाय ग्रम्भोनिधेस्तटरु
हास्तरवोऽपिपेनवेलाजलोच्छलितरत्नकृताल
वालाः २४ नाक्रोशयोयाहरतिसिंचतिवाविसर्गमा
नोन्नतिंदिशतिपापमपाकरोति चेतःप्रसादयति
दिव्वननेतिकीर्तिसन्तोगतिःकथयकिंनकरोति
प्रेमाम् २५ ह्रीकरोतिक्रमतिविमलीकरोतिचेत
श्चिरेतनमथेत्रुलकीकरोति भूतेषुकिंचकरुणां
बहुलीकरोतिसंगःसतांकिमुननमंगलमातनोति २६
कान्तारभूमिरुहमौलिनिवासशीलाःप्रायःपला
यनपरागजनवीक्षणेन कृन्तन्तितेऽपिहिंसकाःख
लग्रामनामसंगःस्वभावविपरीतविधौनिदानम् २७
दोषाकरोऽपिकुटिलोऽपिकलंकितोऽपि मित्रावसा
नसमयेविहितोदयोऽपि चन्द्रस्तथापिहरवल्लभ
तामुपैति नैवाश्रितेषुमहतांगुणदोषशंका २८
एकेकेचिद्यतिकरगताःपात्रमंतानभन्तेगायन्त
स्वैरसमधुरंवीणयायेप्रयुक्ताः एकेतेषांसहस्रा
निवृष्यात्रुस्वरेणारयन्तिकेचित्तेषांज्वलितहृदया
रकमेवापिवन्ति २९

१ सुगमम् २ मान्यम् ३ ददाति ४ निराकरोति ५ विस्तारयति ६ दोषा रा
त्रिस्तस्याः करः एते दोषाणामाकरः खलानिरिसमर्थः ७ सर्वेषां समये
ये एते मित्रव्यसनकाले ८ शिवप्रियताम् ९

117

© Dharmartha Trust J&K. Digitized by eGangotri

संतप्तायसिसंस्थितस्यपयसोनामापिनश्रूयते
मुक्ताकारतयातदेवनलिनीपत्रस्थितंराजते स्वा
तौसागरशुक्तिसंपुटगतंतज्जायतेमौक्तिकंप्राये
णाधममध्यमोत्तमगुणाःसंसर्गतोजायते १० गंगेवा
घविनाशिनीजनमनःसंतोषसच्चन्द्रिकातीक्ष्णांशो
रपिसत्प्रभेवजगदज्ञानान्धकारापहा छायेवाखि
लतापनाशनकरीस्वर्धेनुवत्कामदापुण्यैरेवहिल
भ्यतेसुकृतिभिःसत्संगतिर्दुर्लभा ११ कीर्तिर्नृत्यति
नर्तकीवभुवनेविद्योततेसाधुताज्योत्स्नेवप्रतिभ
सभासुसरसागंगेवसंमीलति चित्तंरंजयतिश्रिये
वसततंसंपत्प्रसादोचितासंगत्यानभवेत्सतांकि
लभवेत्किंकिंनलोकोत्तरम् १२ बुद्धिंवर्धयतिश्रियं
वितनुतेवैदग्ध्यमासिंचति श्रेयःपल्लवयत्यघानि
दलयत्युन्मीलयत्युन्नतिम् विज्ञानंपरिशोधयत्य
पिविनोत्स्त्रैःकलाकौशले किंकिंनारभतेहरेरि
वकथाजन्तोःसतांसंगतम् १३ ग्रावःश्रण्णजलेषुवि
न्दुपतितंशक्तास्यमुक्ताजले कर्पूरंकदलीदलेभुज
रलंव्यालेस्थलेकर्दमः दैवात्पात्रवशात्तदेवपतितं
पात्रान्तरंजायतेस्यातिस्त्रैवपरोपकारकरणंपात्रा
नुसारेफलम् १४

असत्संगतिनिन्दा।

अहोदुर्जनसंसर्गान्मानहानिःपदेपदे पावको

नम्बीतमर्घः १० लोहे

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
११८

लोहसंगेन मुद्गरैरभिहन्यते १ तस्मात्तेन गन्त
व्यं तृणमध्यमैः सह पयोऽपि शौण्डिकीहस्ते म
दिरां मन्यते जनः २ ग्रन्तर्मलिनसंसर्गाद्गुणवा
नपि दुष्यति यद्वृत्तः संनिकर्षेण कर्णोऽधःकुटि
लाश्रयः ३ दुष्टेनादुष्टसंसर्गाद्दुष्टमपि गच्छति
सरोबिन्दुनिपातेन पंचगव्यवदीपयथा ४ ग्रगुण
धमतां संगो सद्गुणांहान्तिविस्तरम् गुणाकूपान्तरे
पातितं कयोगाय यथा पयः ५ बहुभिर्मूर्खसंघातैर
न्योन्यपशुवृत्तिभिः प्रच्छाद्यन्ते गुणाः सर्वे मेघैरिव
दिवाकरः ६ उत्तमैः क्रियते पूतैः श्रीमानात्मविशुद्ध
ये किं नाम खलसंसर्गः क्रूरेनाश्रयाशयन् ७ ग्रा
नन्दमृगदावाग्निः शीलशाखिमदद्विपः ज्ञानदी
पमहावायुरयं खलसमागमः ८ पात्रमपात्रीकुरु
ते दहति गुणं स्नेहमाशु नाशयति ग्रमले मलिनि
यच्छति दीपज्वालेव खलमैत्री ९ दुर्जनजनसंस
र्गात्सज्जनपुरुषोऽप्यदोषमायाति रावणकृताप
राधाज्जलधेरपि वन्धनं प्राप्तम् १० खलेनापि सह
नवासनापि वालिमूर्धापि किं नाम्यदोऽपि सन् यदिवा
लिशवक्रसंगमान्निपतन्त्येव वधूकचाविव ११
संगानिस्ताविपरीतगुणोत्कमाकृष्याः खलसंवेम
मेघः शमिन्

१ मणविक्रयकर्त्री २ मद्यम् ३ ग्रानन्दपवमृगस्य दावा
ग्निरिव दाहकत्वात् ४ शीलमेव शाखी वृक्षस्तस्य मदद्विपः इव उन्मूलकत्वा
त् ५ ज्ञानमेव दीपस्तस्य महावात इव निर्वाणकरणत्वात् ६ ग्रयोग्यम्
मलम् पक्षे स्निग्धादि ७ तैलम् पक्षे प्रीतिः ८

118

यश्यपूर्वमपिकृतस्यरूपतामन्तोःपिसमवायनि
श्चितम् ११ शाखोटकैस्तुल्नसंगतोःपिवतोनयोः
कौशिनमायताह्याः यद्योःपिमयेस्यपवेहिमन्यतेसं
सर्गजादोषगुणाभवन्ति १२ उहेनसंगतिरनर्थप
रंपरायाहेतुः सतोभवतिकिंवचनीयमत्र लंकेश
गोहरतिदाशरथेः कलत्रंप्राप्नोतिबन्धनमसौकि
लसिन्धुराजः १४ हंसोःपगस्मममयोहयितेदिना
न्तेकारणःकाकबकश्येनकुलंप्रविष्टः मूकोः
यमितस्वपदहंसान्तिलनन्तिपतामोवाप्रयोरहिमह
तामपमानहेतुः १५

सुमित्रप्रशंसा ।

करणविवशरीरस्तनेत्रयोरिवपदमणी प्रतिवार्य
प्रियंकुर्यात्तन्मित्रंमित्रमुच्यते १ यस्यमित्रेणसंभा
षायस्यमित्रेणसंस्थितिः मित्रेणसहयोभुङ्क्तेततो
नास्तीहपुण्यवान् २ प्राविनेमागिनाशोर्येसामाम
सर्वभूतः सखायोः दातिसंपदावरक्षिसमयनावसह
दुगणाः ३ अन्यथैवहिसौहार्दंभवेत्स्वच्छान्तरात्मनः
प्रवर्ततेःन्यथावाणीशाठ्योपहतचेतसः ४ उत्सवे
व्यसनेचैवदुर्भिक्षेराष्ट्रविप्लवे राजद्वारेश्मशानेच
यस्तिष्ठतिसबान्धवः ५ सकृत्स्यर्थोविपद्गतानामाप
द्दूरणोतमः नतुभीतपरित्राणवस्तुपालंभपात्र
नः ६

मषीम् पदे दोषम् १ मित्रयो भावगणम् ११ तस्मात्तुरुषान १२ निर्मलवि
तवम् १३ दानशीलवम् १४ समानस्य भावः सामान्यम् समतामिन्यर्थः १५ सर
लवम् १६ प्रीतिः ।

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
११५

119

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् मातृ
जंघा हि वत्सस्य स्तम्भीभवति बन्धने १ औरसं कृतसं
बन्धं तथा वंशक्रमागतम् रक्षितं व्यसनेभ्यश्च मित्रं
ज्ञेयं चतुर्विधम् २ याचते कार्यकाले यः स किं भृत्यः
स किं सुहृत् अकार्यकार्यकर्ता यस्तेनादिष्टोऽपि सो
सुहृत् ३ न देवाः स्वर्गमिच्छन्ति यत्र संक्रामति हृदये हृष्टे
स्वं वक्त्रः स्वं च प्रतिच्छायेव दर्पणे ४ आपन्नस्यार्थ
हीनस्य देशान्तरगतस्य च नरस्य शोकदग्धस्य सु
हृद्दर्शनमौषधम् ५ दर्शने स्पर्शने वापि श्रवणे
भाषणेऽपि वा यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्य
ते ६ स्वाभाविकं तु यन्मित्रं भाग्येनैवाभिजायते त
दकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति ७ न मातरि न
दारेषु न सोदर्ये न चात्मनि विश्वासस्तादृशः पुंसां
यादृङ्मित्रे स्वभावजे ८ शोकारातिभयत्राणं प्री
तिविश्रम्भभाजनम् केन रत्नमिदं सृष्टं मित्रमित्य
क्षरद्वयम् ९ उदयेनैव सविता पद्मेष्वर्पयति श्रियं
विभावयन् समृद्धीनां फलं सुहृदनुग्रहम् १० नो हृ
दोऽहङ्गुणेनैव सुहृदामग्रदर्शनम् कार्यसिद्धिप
थः सत्यः स्नेहेनाप्युपलभ्यते ११ प्राणैरपि हिता
वृत्तिरद्रोहो व्याजवर्जनम् आत्मनीव प्रियाधानमे
तन्मैत्रीमहाव्रतम् १२ पापान्निवारयति योजयते हि
ताय गुह्यानि गूहति गुणान्प्रकटीकरोति ।

१ प्रकृतमित्रता २ शत्रुः ३ विश्वासः ४

© Dharmartha Trust J&K. Digitized by eGangotri

आपद्गतं च न जहाति ददाति काले सन्मित्रलक्ष-
णमिदं प्रवदन्ति सन्तः ४ मित्रं प्रीतिरसायनं नय-
नयोरानन्दनं चेतसः पात्रं यत्सुखदुःखयोः सह भ-
वेन्मित्रेण तद्दुर्लभम् ये चान्ये सुहृदः समृद्धिसम-
ये द्रव्याभिलाषाकुलास्ते सर्वत्र मिलन्ति तत्त्वनिक-
षग्रावा तु तेषां विपत् ५ क्षीरेणात्मगतोदका-
य हि गुणा दत्ताः पुरा तेऽखिलाः क्षीरे तापमवेक्ष्य
तेन पयसा स्वात्मा कृशानौ हुतः गन्तुं पावकमुन्म-
नस्तदभवद्दृष्ट्वा तु मित्रापदं युक्तं तेन जलेन शा-
म्यति सतां मैत्री पुनस्त्वीदृशी ६

कुमित्रनिन्दा ।

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् वर्जयेत्ता-
दृशं मित्रं विषकुम्भं पयोमुखम् १ रहस्यभेदो याच्ञा
च नैष्ठुर्यं चलचित्तता क्रोधो निःसत्यता द्यूतमेतन्मि-
त्रस्य दूषणम् २

संसारः ।

संसार तव निःसारपदवी न दवीयसी अन्तरा दु-
स्तरा न स्युर्यदि रे मदिरेक्षणाः १ गतसारेऽत्र संसा-
रे सुखभ्रान्तिः शरीरिणाम् लालापानमिवाङ्गुष्ठे
बालानां स्तन्यविभ्रमः २ दुःखाङ्गारकतीव्रः संसारो-
ऽयं महानसो गहनः इह विषयामिषलालसमान-

सुहृत्त्वं अनुग्रहः प्रसादः स्नेहम् ५ प्रीतेः रसायनमिव रसायनम् प्रीतिवर्धकमित्य-
र्थः ६ ग्रावा ७ मित्रविपत्तिम् ८ शुभप्रकाशनम् ९ मार्गः १० अतिदूरा ११ मध्ये १२
निःसारे १

© Dharmartha Trust J&K. Digitized by eGangotri

समार्जेरमानिपत १ क्वचिद्विद्वद्गोष्ठी क्वचिदपि सु
रामत्तकलहः क्वचिद्वीणावादः क्वचिदपि च हाहे
तिरुदितम् क्वचिद्रम्या रामा क्वचिदपि जराजर्जर
तनुर्न जाने संसारः किममृतमयः किं विषमयः
क्लेक्लिन्नामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भ
गर्ते कान्ताविश्लेषदुःखव्यतिकरविषमे यौवने।
विप्रयोगः नारीणामप्यवज्ञा विलसति नियतं वृ
द्धभावेऽप्यसाधुः संसारे रे मनुष्या वदत यदि सुखं
स्तोकमप्यस्ति किंचित् ५

गृहस्थाश्रमप्रशंसा।

न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः श्राद्ध
कृत्सत्यवादी च गृहस्थोऽपि विमुच्यते १ यदि रामा·
यदि तनयो विनयगुणोपेतः तनये तनयोत्पत्तिः
सुरवरनगरे किमाधिक्यम् २ सविप्रपादोदक·
कर्दमानि सवेदशास्त्रध्वनिगर्जितानि स्वाहास्वधा
कारनिरन्तराणि स्थानानन्दनस्थानि गृहाणि तानि ३
सानन्दं सदनं सुतास्तु सुधियः कान्ता न दुर्भाषिणी
सन्मित्रं सधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः
आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः

१ पाकगृहम् २ अशुचिमलादि तन्मध्ये ३ जराभग्ना वृद्धशरीरैः ४
गर्भाशये ५ अवमानः ६ अल्पम् ७ न्यायेन संपादितं धनं येन ८ मुक्तो
भवति ९ स्त्री १० लक्ष्मीः ११ ब्राह्मणचरणक्षालनोदकेन पङ्किलानि १२

मानुष्यं वरवंशजन्म विभवो दीर्घायुरारोग्यता स
न्मित्रं सुसुतः सती प्रियतमा भक्तिश्च नारायणे विद्व
त्त्वं सुजनत्वमिन्द्रियजयः सत्पात्रदाने रतिस्ते पुण्ये
न विना त्रयोदश गुणाः संसारिणां दुर्लभाः १ वेश्या
विश्रावनेसोजनुरनुपहूतेसान्नमेवमसकान्तेली
लाशीलाद्दूकुलात्तापिनकलिमत्ताकापिविपान
वध्वा वाणी वेणीगुणानां समधिकयशसां सापि कं
सापिकाश्रीः श्रीमद्दोरीमधूरीमुद्रिरगरहूरवनक्रू
पापविपाकः २

गृहस्थाश्रमहर्षणम् ।

यत्र नास्ति दधिमन्थनघोषो यत्र नो लघुलघूनि शि
शूनि यत्र नास्ति गुरुगौरवपूजा तानि किं वत गृहा
णि वनानि १ न विप्रपादोदकपङ्किलानि न वेदशा
स्त्रध्वनिगर्जितानि स्वाहास्वधाकारविवर्जितानि श्म
शानतुल्यानि गृहाणि तानि २ क्रोशन्तः शिशवः
सवारि सदनं पङ्काकुलं चाङ्गणं शय्या दंशवती च रू
क्षमशनं धूमेन पूर्णं गृहम् भार्या निष्ठुरभाषिणी
प्रभुरपि क्रोधेन पूर्णः सदा स्नानं शीतलवारिणा हि
सततं धिग्धिग्गृहस्थाश्रमम् ३ नार्वाह्यानवद्या।
गुणगणमहिमा रूपसम्पत्तिशौर्यं स्वस्थाने सर्व·

गृहम् १३ उत्तमकुलउत्पत्तिः १४ ऐश्वर्यम् १५ विद्याभूषणम् १६ मनः १७
निर्दोषा १८ प्रवाहः १९ मायायिनी २० गोधैव मधुरी तस्या मुदिरो मेघः २१
हे विघ्ननाशक २२ परिणामः फलमित्यर्थः २३ उदकपूर्णम् २४ म
शाकपूर्णा २५ ग्रीष्मत्रयम् २६ कठोरभाषिणी·

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
१२१

शोभापरगुणाकर्षणेनेवाकाङ्क्षन्तावेदेव यावत्पाका
ङ्गलभिः स्वगृहप्रवर्तिभिः प्रेषितापत्यवक्त्राङ्केवा बा
ल्लिन्नैतेलेनचलवत्ताममयोन्मादिवादोषचारः ४

पुत्रप्रशंसा।

इदं नन्वेहसर्वस्वं सममातृदरिद्रयोः अचन्दनम
नोशीरं हृदयस्यानुलेपनम् १ गृहेऽजानुचरः केलो
मृदुस्मितमुखाम्बुजः पुत्रः पुण्यवतामेव पात्रीभ
वति नेत्रयोः २ स्वगर्भशुक्तिनिर्भिन्नं सद्वृत्तं सन्तमौ
क्तिकम् वंशश्रीतिलकीभूतं मन्दभाग्यस्य दुर्लभ
म् वर्धते नाविरं लोके वंशलक्ष्मीरसंततिः स्वस्यावशे
षितस्नेहवर्तिमालेव दीपिका ४ अन्तःकरणतन्
त्रदंपत्योः स्नेहसंश्रयात् आनन्दग्रन्थिरेकोऽयम
पत्यमिति वध्यते ५ दिग्वाससं गतव्रीडं जटिलं धूलि
धूसरम् पुण्याधिका हि पश्यन्ति गंगाधरमिवात्म
जम् ६ निन्द्यते पितरमिलन्मैनिरपत्यधनः पुमान् अ
धनी नैरति श्रान्ते रवकेश विपादपः ७ उरोरुहाङ्कुर
मितैः पयोभिरापूर्यकेऽन्याने नमासगर्भम् कुल्ल
मभानेवदनेहसन्नेतनूभवे पश्यतिकोऽपि धन्यः
कृतनूवरः कम्पानगतोत्र किं विकणवकिंकिकालि
कृदडुपमम यदि सन्मस्तिहिते सन्तोम्निते प्यानदिदंस
मधं हते भवतदानीम् ९

१ इदं नु पितरौ किकं संबोधनम् २ जानुभ्यां चरतीति सः ३ बिडुमाण इत्य
र्थः ४ संततिरहिता ५ नग्नम् ६ पामर्यैः ८ बन्ध्याः ७

© Dharmartha Trust J&K. Digitized by eGangotri

अहं किमन्या किमभीष्टतापैरेतेन वेति मा वर्धरिता
तदृच्छया प्रलोभनत्वं प्रवदन्तमर्भकं मुदा हसन्ति
इति मूर्धि पुण्यभाक् ॥ आलस्यदन्तमुकुलानि निमि-
त्तहासैरव्यक्तवर्णरमणीयवचः प्रवृत्तीन् अंकाश्र-
यप्रणयिनस्तनयान्वहन्तो धन्यास्तदंगरजसा म-
लिनीभवन्ति ॥ आनन्दहन्तिरात्मनो नयनयोरन्तः
सुधाभ्यञ्जने प्रस्तारः प्रणयस्य मन्मथतरोः शुभ्राम्बु
सारो रतेः आलाने हृदयद्विपस्य विषयारण्यप्रसंचा-
रिणो दैयस्योरिह लभ्यते सुकृततः संसारसारः सुतः ॥ १२

सत्पुत्रप्रशंसा ।

एकोऽपि गुणवान्पुत्रो निर्गुणैः किं शतेन तैः । एकश्च-
न्द्रो जगच्चक्षुर्नक्षत्रैः किं प्रयोजनम् । एकेन हि सुवृ-
क्षेण पुष्पितेन सुगन्धिना वासितं तद्वनं सर्वं सुपुत्रेण
कुलं यथा २ प्रज्ञया वा विसारिण्या यो बलेन धनेन
वा धुरं वहति गोत्रस्य जननी तेन पुत्रिणी ३ एकेना-
पि सुपुत्रेण विद्यायुक्तेन भासते कुलं पुरुषसिंहेन ।
चन्द्रेणेव हि शर्वरी ४ को धन्यो बहुभिः पुत्रैः कुशूला-
पूरणाढकैः वरमेकः कुलालम्बी यत्र विश्रूयते पिता
पुण्यतीर्थे कृते येन तपः क्वाप्यतिदुष्करम् तस्य पुत्रो
भवेद्वश्यः समृद्धो धार्मिकः सुधीः ६ वरमेको गुणी
पुत्रो न च मूर्खशतैरपि एकश्चन्द्रस्तमो हन्ति न च तारा

लालनात् ८ माता ९ इष्टस्थाने १० प्रलोभ्यस्य प्रलोभनार्थं दर्शितस्य वस्तुनो ११
नृरूपम् ११ अवज्ञानं करोति १२ गजबन्धनस्तम्भः १३ प्रसरण-
शीलया १४ कार्यभारम् १५ पुरुषश्रेष्ठेन १

गणैरपि ७ एकेनापि सुपुत्रेण सिंही स्वपिति निर्भ
यम् सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ८ ए
केनापि सुपुत्रेण जायमानेन सत्कुलम् शशिना चै
व गगनं सर्वदैवोज्ज्वलीकृतम् ९ किं जातैर्बहुभिः
पुत्रैः शोकसन्तापकारकैः वरमेकः कुलालम्बी य
त्र विश्राम्यते कुलम् १० किं स्पृष्टेन श्रुतवचनेन पुनरपि
स्पृष्टं देवश्रुतवचनम् स्पृष्टान् स्पृष्टनरे किं कृतिप
रिपर्कं तदेवश्रुतवचनम् ११ कुंभः परिमितमंभः
पिबत्यसौ कुंभसंभवोऽम्भोधिम् अतिरिच्यते सुज
न्मा कश्चिज्जनकं निजेन चरितेन १२ विद्याविहीना
बहवोऽपि पुत्राः कल्पायुषः सन्तु पितुः किमेतैः च
यिष्णुना वापि कलावता वा तस्य प्रमोदः शशिनेव
सिन्धोः १३ पात्रेन तापयति नैव मलं प्रसूते स्नेहं
न संहरति नैव गुणान् क्षिणोति द्रव्यावसानसम
ये चलतां न धत्ते सत्पुत्र एव कुलसद्मनि कोऽपि
दीपः १४

कुपुत्रनिन्दा।

किं तेन जातु जातेन मातुर्यौवनहारिणा आरोह
ति न यः स्वस्य वंशस्याग्रे ध्वजो यथा १ किं तया क्रिय
ते धेन्वा या न दोग्ध्री न गर्भिणी कोऽर्थः पुत्रेण जातेन
यो न विद्वान् न धार्मिकः २ एकेन शुष्कवृक्षेण दह्यमा
नेन वह्निना दह्यते तद्वनं सर्वं कुपुत्रेण कुलं तथा ३

१ गणैः २ मधुरम् ३ आगल्भः ४ अधिको भवति ५ आचरणेन ६ क्षयशीलेन
कलाधुर्येण ७ चन्द्रेण ८ कुलमेव सद्म गृहं तस्मिन् ९ कदाचित् १० यौवन
नाशकेन ११

कोटरान्तःस्थितोवह्निस्तरुमेकंदहेन्नवलकुपुत्रस्तु
कुलेजातःस्वकुलंनाशयत्यहो ४ अजातमृतमूर्खा
णांवरमाद्यौनचान्तिमः सकृद्दुःखकरावाद्यावन्ति
मस्तुपदेपदे ५ अजातमृतमूर्खेभ्योमृताजातौसु
तौवरौ यतस्तावल्पदुःखाययावज्जीवंजडोदहेत्
यस्यपुत्रोनवैविद्वान्नशूरोनचधार्मिकः अप्रकाश
कुलेनस्यनष्टचन्द्रेवशर्वरी ६ अविनीतःसुतोजा
तःकथंनदहनात्मकः विनीतस्तुसुतोजातःक
थंनपुरुषोत्तमः ७ दानेतपसिशौर्येचयस्यनप्रथि
तंयशः विद्यायामर्थलाभेवमातुरुच्चारएवसः ८
निरुत्साहंनिरानन्दंनिर्वीर्यमरिनन्दनम् मास्म
सीमन्तिनीकाविज्जनयेत्पुत्रमीदृशम् ९ वरंगर्भ
स्रावोवरमपिचनैवाभिगमनंवरंजातप्रेतोवर
मपिचकन्यैवजनिता वरंवन्ध्याभार्यावरमपि
चगर्भेषुवसतिर्नवाविद्वान्रूपद्रविणगुणयुक्तो
पितनयः १० पित्रोर्नैववचःशृणोतिदिवसस्यागे
वजन्यालयेयान्तीभिर्युवतीभिरध्वनिसङ्गःकौतू
हलेविन्दति। वस्तूनामुपदेशवाविवदतिक्रोधे
कृतानेवचःसाधून्निन्दतिदुर्जनेनचमनस्तेनोमित्रंकुपु
त्रोजनः ११

दैवाख्यानम्।

दैवमुल्लङ्घ्ययत्कार्यंक्रियतेफलवन्नतत्

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
१२३

सरोभस्त्रात केनापि गलरन्ध्रेण गच्छति १ भाग्यवन्तं
प्रसूयेथा मा शूरं मा च पण्डितम् शूराश्च कृतविद्याश्च
वने सीदन्ति पाण्डवाः २ न केवलं मनुष्येषु दैवं देवे
ष्वपि प्रभुः सतिमित्रे धनाध्यक्षे चर्म प्रावरणो हरः ३
सच्छिद्रो मध्यकुटिलः कर्णः स्वर्णस्य भाजनम् पि
दैवे निर्मले चक्षुः पात्रे कज्जलभस्मनः ४ भगवन्तौ
जगन्नेत्रे सूर्याचन्द्रमसावपि पश्य गच्छत एवास्तं नि
यतिः केन लङ्घ्यते ५ किं करोति नरः प्राज्ञः शूरो वा
प्यथ पण्डितः दैवं यस्य फलान्वेषि करोति विफलाः
123 क्रियाः ६ दैवे विमुखतां याते न कोप्यस्ति सहायवान्
पिता माता तथा भार्या भ्राता वाथ सहोदरः ७ पिब
न्ति मधु पद्मेषु भृङ्गाः केसरधूसराः हंसाः शैवाल
मश्नन्ति धिग्दैवमसमञ्जसम् ८ करोतु नाम नीति
ज्ञो व्यवसायमितस्ततः फलं पुनस्तदेवास्य यद्वि
धेर्मनसि स्थितम् ९ दैवं फलति सर्वत्र न विद्या न च
पौरुषम् समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम् १०
दैवं फलति सर्वत्र न विद्या न च पौरुषम् पाषाण
स्य कृतो विद्या येन देवत्वमागतः ११ यथा धेनुसहस्रे
षु वत्सो विन्दति मातरम् तथा पूर्वकृतं कर्म कर्ता
रमनुगच्छति १२ रोगशोकपरीतापबन्धनव्यसना
नि च आत्मापराधवृक्षाणां फलान्येतानि देहिनाम् १३
श्रेयोघ्यमानानि यथा पुष्पाणि च फलानि च

१ दैवम् २ पराक्रमः ३ प्राप्नोति ४

© Dharmartha Trust J&K. Digitized by eGangotri

स्वे कालेनातिवर्तन्ते तथा कर्म पुराकृतम् विपत्तौ
किं विषादेन संपत्तौ हर्षेणन किम् भवितव्यं भव
त्येव कर्मणामीदृशी गतिः ॥ १५ ॥ हरिणापि हरेणापि ब्र
ह्मणापि सुरैरपि ललाटलिखिता रेखा न शक्या प-
रिमार्जितुम् ॥ १६ ॥ सुहृदो ज्ञातयः पुत्रा भ्रातरः पितराव
पि नानुस्मरन्ति स्वजनं यस्य दैवमदक्षिणम् ॥ १७ ॥ अचि
न्तितानि दुःखानि यथैवायान्ति देहिनाम् सुखान्यपि
तथा मन्ये दैवमत्रातिरिच्यते ॥ १८ ॥ अयाचितः सुखं दत्ते
याचितश्च न यच्छति सर्वस्वं वापि हरते विधिरुच्छृङ्ख
लो नृणाम् ॥ १९ ॥ मनोरथाः कोटिशतैर्जनो दैवहतानपि
सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलसाधनम् पिता
रत्नाकरो यस्य लक्ष्मीर्यस्य सहोदरी शंखो भिक्षाट
नं कुर्यात्फलं भाग्यानुसारतः ॥ २१ ॥ तादृशी जायते बुद्धि
र्व्यवसायोऽपि तादृशः सहायास्तादृशा एव यादृ-
शी भवितव्यता ॥ २२ ॥ भवितव्यं भवत्येव नारिकेलफ
लाम्बुवत् गन्तव्यं गतमित्याहुर्गजभुक्तकपित्थवत् २२
महतामाश्रयः पुंसां फलं भाग्यानुसारतः ईशस्य कु
ण्डलप्राप्तोऽपि वासुकिर्वायुभक्षकः ॥ २४ ॥ कर्मायत्तं फलं
पुंसां बुद्धिः कर्मानुसारिणी तथापि सुधिया भाव्यं
सुविचार्यैव कुर्वता ॥ २५ ॥ कर्मणा बाध्यते बुद्धिर्न बुद्ध्या
कर्म बाध्यते सुबुद्धिरपि यद्रामो हैमं हरिणमन्वगा
अग्रे ग्रंथमाणानि ५ खेदेन ८ दैवे १ त् ॥ २६ ॥

२
सभा
१२४

124

अघटितघटितं घटयति सुघटितघटितानि दुर्घ
टीकुरुते विधिरेव तानि घटयति यानि पुमान्नैव
चिन्तयति २७ विकटाटव्यामटनैः शिलाधिरोहण
मपां निधेस्तरणम् निगडे गुहाप्रवेशो विधिपरि
पाकः कथं न सेनायाः २८ स्ववशः करोति कर्मेष
मादतस्तु परवशो भवति स्ववशोऽरोहति वृक्षे नि
पतत्यवशस्ततः पुरुषः २९ किं तेन वेत्सि जगति
प्रख्याते लाभकारणं मूलम् विधिलिखितानुसार
माले फलति कपालेन भूपालः ३० द्वीपादन्यस्मा
दपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् आनीय
झटिति घटयति विधिरभिमतमभिमुखीभूतः ३१
अनुकूले सति धातरि भवत्यनिष्टादपीष्टमवि
लम्बम् पीत्वा विषमपि शम्भुर्मृत्युञ्जयतामवाप
तत्कालम् ३२ अनुचितमेवाचरितं पश्यातीना
यद्विधेः शिरश्छिन्नम् छिन्नं न चास्य हस्तो येनाय
दुर्लिपिं लिखति ३३ यन्मनोरथशतैरगोचरं नस्पृ
शन्ति कवयोऽपि गिरा यत् स्वप्नवृत्तिरपि यत्र दुर्ल
भा लीलयैव विदधाति तद्विधिः ३४ अरक्षितं तिष्ठ
ति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति जीव
त्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे
विनश्यति ३५ दातावलिः प्रार्थयिता च विष्णुर्दाने
भुवो वाजिमखस्य कालः ।

दैवे २ दुर्लभम् ३

© Dharmartha Trust J&K. Digitized by eGangotri

नमोऽस्तु तस्मै भवितव्यतायै यस्याः फलं बन्धनमेव
जातम् ३९ प्राप्तव्यमर्थं लभते मनुष्यो देवोऽपि तं लंघ
यितुं न शक्तः तस्मान्न शोचामि न विस्मयो मे यदस्मदी
यं न हि तत्परेषाम् ४० माया च माया च विनैव दैवं नो
पायवंने साधनमस्ति तस्याः चेष्टावने साधनमस्ति त
स्याः छायावमानोऽपि लभेत लक्ष्मीम् ४१ ईशः कर
स्थीकृतकांचनाद्रिः कुबेरमित्रं रजताचलस्थः तथापि
भिक्षाटनमस्य जातं विधौ शिरःस्थे स्फटिके कृतः श्रीः ५८
स्वयं महेशः श्वशुरो नगेशः सखा धनेशस्तनयो ग।
णेशः तथापि भिक्षाटनमेव शंभोर्बलीयसी केवल
मीश्वरेच्छा ४२ असंभवं हेममृगस्य जन्म तथापि रामो
लुलुभे मृगाय प्रायः समासन्नविपत्तिकाले धियो
ऽपि पुंसां मलिनीभवन्ति ४३ न भूतपूर्वो न च केन दृष्टो
हेम्नः कुरंगो न कदापि वार्ता तथापि तृष्णा रघुनन्द।
नस्य विनाशकाले विपरीतबुद्धिः ४४ धनानि भूमौ प
शवश्च गोष्ठे भार्या गृहद्वारि जनः श्मशाने देहश्चिता।
यां परलोकमार्गे कर्मानुगो गच्छति जीव एकः ४५
वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृता
नि सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबु
द्धिरेषा अहं करोमीति वृथाभिमानः स्वकर्मसूत्रग्रथ।

अश्वमेधस्य ५ दैवे पतते चन्द्रे ५ वक्रेः पत्ते विपरीते ९ हिमालयः ।

२
सभा
१२५

125

यिनोहिलोकः ४५ यः स्मरस्तद्वनिताकृपायास्त
न्दीसापतिरूपहीना यद्योभयेनत्वदरिद्रताच वि
येर्विविचाणिविचेष्टितानि ४६ भ्रमनवनान्तेनवम
ः नरीष्ठनवट्पदोगनन्यफलीमजिघ्रत् साकिंनरम्या
सवकिंनरनावलीपसीकेवलमीश्वरेच्छा ४७ वि
योविरूढेनपयः पयोनिधौसुधौघसिन्धौनसुधा
सुधाकरेणवाञ्छितंसिध्यतिकल्पपादपेनहेमहेम
प्रभवेगिरावपि ४८ ललाटपट्टेलिखिताविरिंचिना
वर्णावलीयाकिलतांप्रमाष्टुम् नकोऽपिशक्तोऽत्रय
यामलाशयानचातकस्तृशमनाभवन्ति ४९ निप
ततिकिलदुर्बलेषुदैवंनरवितर्धननयेनकारणे
न वलवतिनतथायथाबलानांप्रभवतिकृष्णशा।
रमेनामनोभूः ५० हरशिरसिशिरांसियानिरेजुः
शिवशिवतानिलुठन्तिगृध्रपादे अपिखलविष
मः पुराकृतानांभवतिहिजन्तुषुकर्मणांविपाकः
क्वचनतुजनकाधिराजपुत्रीक्वचदशकन्धरमन्दि
रेनिवासः अपिखलविषमःपुराकृतानांभवति
हिजन्तुषुकर्मणांविपाकः ५१ क्वनुकुलमकलंक
मायतास्याः क्वनुरजनीचरसंगमापवादः अपिख
लविषमःपुराकृतानांभवतिहिजन्तुषुकर्मणांवि
पाकः ५२ स्तुतिताववदशेषगुणाकरेषुरुषरत्नम
लंकरणंभुवः नदपितन्त्वणाभङ्गिकरोतिवेर
२ समककलिकायाम २

हृहृकष्टमणिनतांविधेः ५४ गजभुजंगमयो
रपिबन्धनेशशिदिवाकरयोर्ग्रहपीडनम् मति
मतांचसमीक्ष्यदरिद्रतांविधिरहोबलवानितिमे
मतिः ५५ प्रतिकूलतामुपगतेहिविधौविफलत्व
मेतिबहुसाधनता अवलम्बनायदिनभर्तुरभून्न
पतिष्यतःकरसहस्रमपि ५६ यस्माच्चयेनचयथा
चयदाचयच्चयावच्चयत्रचशुभाशुभमात्मकर्म
तस्माच्चतेनचतथाचतदाचतच्चतावच्चतत्र
चविधातृवशादुपैति ५७ नैवाकृतिःफलतिनैव
कुलंनशीलंविद्यापिनैवनचयत्नकृतापिसेवा भा
ग्यानिपूर्वतपसाकिलसंचितानिकालेफलन्तिपु
रुषस्ययथैववृक्षाः ५८ आकाशमुत्पततुगच्छतुवा
दिगन्तमम्भोनिधिंविशतुवायथेच्छम् जन्मान्तरा
र्जितशुभाशुभकृन्नराणांछायेवनत्यजतिकर्मफ
लानुबन्धः ५९ भीमेवनेभवतितस्यपुरंप्रधानंस
र्वोजनःस्वजनतामुपयातितस्य कृत्स्नाचभूर्भवति
सन्निधिरत्नपूर्णायस्यास्तिपूर्वसुकृतंविपुलंनरस्य ९०
कैवंतककेशाकरग्रहणाभ्युन्नतापिमातान्तरेनिपति
तःशफरोवराकः दैवाननेनविगलितेनगिलितोव
केनवकेनविधौवदकस्यकवसायसिद्धिः ६० दैवेसम
र्थविरसंचितकर्मजालंस्वस्थाःस्वलंवसनताकिंपर
यावनाभिःमेरुंप्रदक्षिणयतोऽपिरवि

मूर्खता १ दैववशात्

© Dharmartha Trust J&K. Digitized by eGangotri

र
सभा
१२६

शाकरस्यैतेतस्य समनन्तरगा न कदाचिद्दृष्टो ९२ येना
ञ्चलेन सरसीरुहलोचनायास्त्रातः प्रभूतपवनादुद
येषु दीपः तेनैव सोऽस्तसमयेऽस्तमयं विनीतः क्रुद्धे
विधौ भजति मित्रममित्रभावम् ९३ आधोरणाङ्कु
शभयात्करिकुम्भशुम्भन्नातेपयोपरशुगहृदयेऽङ्गला
नाम् नवापि वल्लभनखक्षतभेदभिन्नैवास्य याभ
वति यल्लिखितं विधात्रा ९४ संमानमान्यमकरन्द
रसां क्रमेण पातुं गतस्य कलिकां कमलस्य भृङ्गः
रथ्यान्निपत्य सहसैव बहिर्मनेनैषाववामे विधौ न हि
फलन्त्यभिवाञ्छितानि ९५ सदसि विदुरभीष्मद्रोण
शारद्वतानां पतिभिरमरकल्पैः पञ्चभिः पालितापि
गृहदुपरिभवस्य द्रौपदी पात्रमासीद्भवति मति
दैवबन्धुभिः किं विधेयम् ९६ गुणवदगुणवद्वाकु
र्वता कार्यमादौ परिणतिरवधार्या यत्नतः पण्डितेन
अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदय
दाही शल्यतुल्यो विपाकः ९७ स हि गगनविहारी क
ल्मषध्वंसकारी दशशतकरधारी ज्योतिषां मध्यचा
री विधुरपि विधियोगाद्ग्रस्यते राहुणासौ लिखित
मपि ललाटे प्रोज्झितुं कः समर्थः ९८ अयममृतनिधा
नं नायकोऽप्योषधीनां शतभिषगनुयातः शंभुमूर्ध्नो
ऽवतंसः विरहयति न चैनं राजयक्ष्मा शशांकं हतवि
धिपरिपाकः केन वा लंघनीयः ९९

१ सभायाम् २ देवकल्पैः ३ पराभवस्य ४ परिणामः ५ निश्चयेन ६ अति
त्वरया ७ आकाशसंचारी ८ अन्धकारनाशकर्ता ९

126

© Dharmartha Trust J&K. Digitized by eGangotri

श्रियमखिलविपद्गराग्रान्तप्रपातपरंपरापरिवयव
ले विनतो वकेनिधाय विधिः खलः सद्ममिवबलानि
एधीकृत्य प्रगल्भफलालवद्भ्रयति मनोनोनानीमः कि
मत्र करिष्यति ॥१॥ क्वचिन्मोणिमामेवघटितमपि कार्यं
विघटयत्यशक्तोकेनापि क्वचिद्घटमानं घटयति
न देवं सर्वेषामुपरिपरितोनानाग्रतिविधावुपालम्भः
कोः येन ननतनुयनोपार्जनविधौ ॥२॥ नमस्यामो देवान्
नहन्त विधिरस्ते पि वशगा विधिर्वन्द्यः सोऽपि प्रतिनि
यतकर्मैकफलदः फलं कर्मायत्तं यदि किममरैः
किं च विधिना नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभ
वति ॥३॥ त्रिलोकेशः शार्ङ्गी शबरशरतस्त्वनमगम(
द्विधाता लोकानामलभत शिरःकृन्तनविधिम् प्र
यातौ तौ राहोर्दिनकरशशाङ्कौ कवलतां प्रभुर्नेशः
शम्भुः शिरसि लिखितं लेखपतिकः ॥४॥ स्वयं यो
नेपकथमपि कलंकस्य कणिका विधात्रे तेघोऽपि
न च गुणानि पेलस्य किमपि स किं नात्रः श्रेणान किय
ह रच्चू गर्वं न मगौ नैवा हन्ति धान्त जगदुपरि किंवा
नवमति ॥५॥ ललाटे गोमायो मृगपरिवादे ह्यापद
फले कोरिष्यत्कार्ये सोपि किमिह स्मादिमानेगमयसि

नक्षत्राणाम् १० समर्थो भवति ११ कृत्स्नः १२ शबरो जरानामा भिल्लः प्रभासे
परस्परं कलहेनाखिलयादवोपसंहारानन्तरम् सम्पस्याधस्ताद्धामोरौ
दक्षिणं पादं निधायास्थिते भगवति जरानाम्ना भिल्लेन हरिणो भग
वच्चरणं दृष्ट्वा मृगमुखभ्रमाद्भगवत्पादो बाणेन विद्ध इति भागव
ते १३ प्रभा १४ शिरःकर्तनम् १५ ग्रासनम् १६ महिषे १७

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
१२२

127

निमग्नः पंकेऽस्मिन्नतनुभवकरीन्द्रोऽपि पदशो ममंदं
मंदं वा विषिलिखितमुन्मूलयति कः ॥ धुनोति ध्वा
न्तानि व्यपनयति नीहारपटलं करोते राजीवानां दा
लयति रथाङ्गं रमयति जगद्व्यापी देवः स्तवयति
जनानां वनयनेन यातिस्थेमाने यदितदिह देवेन
यतकः १९ नयवामीवाग्णास्तदपिहरलक्ष्ये यनुरी
दं सपवाहे यार्थः प्रमथितमहारातिनिवयः स्माला
न्तागोध्यो हरिवरणावितेकशरणा द्विपन्ने गोप
लैर्विधिरपिवलीयान्मतनुः ॥ पतैनैवपदाकरी
रविटपेरोघोवसन्तस्य किंनालकेन विलोकते
यदि दिवामूर्धस्य किंहषणाम यागनैवपतन्तिवा
तकमनुबेमवस्य किंहषणां यदाज्ञानिजभालपट्ट
त्तिखितेन्नमार्गिनेकः त्तमः १८ यासार्धं स्तुवला
करोति विडुयोमूर्ध्वोह्रितान्छोविगाः प्रपत्तेकृतै
परोतमस्ते हालाहलेन तत्क्षणान् नामारायपस
न्द्रियो भगवती भोक्तेफले वांछिते हे साधो ध्यसने
गुणेणविपलेखास्याहयामाकृष्या ॥ ब्रह्माद्येन कृ
तालवतियमितो ब्रह्माण्डभाण्डोदरे विसर्जेनदः
शावनारगहनेनितिमः मदासंकटे कृशेयन कपाल
पाणिघटकेमितोटने कारितः सर्पो भ्राम्यति नित्य
मेवगगनेतस्मै नमः कर्मणे ८

मगधूर्तके १ विद्याभीतेन २ शोषायितम् ३ समर्थः ४

© Dharmartha Trust J&K. Digitized by eGangotri

यच्छायानिजभालपट्टलिखितेलोकेमरुद्यापनेनत्या
मोतिमरुस्थलेऽपिनितरांमेरौनमोनाधिकम् नह्ये
रोभववित्रवल्कृपणोह्वतिंह्याभाकृष्याः कूपे
पश्यपयोनिधावपिघटोशृह्णातितुल्यंजलम् ११
नेतायस्यबृहस्पतिःप्रहरणंवज्रंसुराःसैनिकाःस्व
र्गोदुर्गमनुग्रहःकिलहरेरैरावतोवारणः इत्याश्च
र्यबलान्वितोऽपिबलिभिर्भग्नःपरैःसंगरेतद्युक्तंव
रमेवदैवशरणंधिग्धिग्वृथापौरुषम् १२ रामो
येनविडम्बितोमृगमयस्वर्णःकलङ्कीकृतस्तारा
सुःसरितोपतिस्तुनहुषःसर्पःकपालीहरः मार्गः
सोमुनिःशूलपीडितनतुर्भिक्षाभुजःपाण्डवाःनी
तोयेनरसातलेवलिरसौतस्मैनमःकर्मणे १३
जातःसूर्यकुलेपितादशरथःक्षोणीभुजामग्रणीः
सीतासत्यपरायणाप्रणयिनीयस्यानुजोलक्ष्मणः
दोर्दण्डेनसमोनचास्तिभुवनेप्रत्यक्षविष्णुःस्वयं
रामोयेनविडम्बितोऽपिविधिनाचान्यजनेकाकथा १४
जामाताशुरुषोत्तमोभगवतीलक्ष्मीःस्वयंकन्यका
हूतोयस्यबभूवकौशिकमुनिर्यज्ञावसिष्ठःस्वयं
दाताश्रीजनकःप्रदानसमयेवेकादशस्यायहाः
किंब्रूमोभवितव्यतांहतविधेरामोऽपियातोवनम् १५
आसायामपिमहोदधिंनविदूषोजातोजलेवीज्डवो
मेवंप्राप्यनवानकोऽपिचरणौभात्तेनलेभेऽरुणः

वन्द्यः शंकरशेखरेऽपि निवसन्यत्नन्नयेत्नीयतेश
यः सज्जनसंगतो हि लभते दैवानुरूपं फलम् ८७
यावद्भाग्यमहोदयो न हि भवेत्तावन्निरर्थो गुणा
विद्यावेदविनोदशास्त्रकविताचातुर्ययशसादयः
भाग्ये तिष्ठति निर्गुणोऽपि गुणिनामग्रेसरो जायते
मान्याः सर्वगुणा गुणा गुणिनि भवेद्भाग्याय तस्मै नमः
आहारेण विना धनेन मधुरता वाचालता माधवेव
मौनित्वं ममनाञ्जनेषु निरता नीडे पराधीनता पत्रैरे
वगुणैर्युताः परभृतो मत्काकिमेते जना वन्दन्ते
खलु खंजनेक्रमिभुजं चित्रा गतिः कर्मणाम् ८८
गीते कोकिलवेन मधुरारसविदः श्रोत्रावलि कर्णोर
ते नोः किं विहितं वनिते न रुद्दलै रेव स्वयं जीवसि
कर्णाग्रे हरमुद्दिरन्ति विकृते काकारुते नध्वावलि
प्रतापवादि शान्ति रूतलिपि गिदेव क्रे विधेः कोरिते
छिन्नापाशमपास्य कूटरचनां भङ्क्त्वा बलाद्दाग्
रां पर्यन्ताग्निशिखाकलापजटिलान्निःसृत्य दूरं व
नान्त व्याधानां शरगोचरादतिजवेनोत्प्लुत्य धाव
न्मृगः कूपान्तः पतितः करोतु विमुखे किं वा विधौ
पौरुषम् ८९ लब्धं जन्म सरस्त्रियापास्यमपि द्वे लोक
भूषाकरः श्रियस्य परमेश्वरामृपगततेनापि पू
र्णोऽपि नः शुद्धिश्शीतकरस्तथापि न गतः क्षीणः परं
आश्रयम् १ वसन्ते ७ फलाय ९ कोकिलाः १ मृगवामिनी २

128

© Dharmartha Trust J&K. Digitized by eGangotri

प्रभूतप्रायः प्राक्तनमेवकर्मबलवत्कः कस्यकर्तुं।
त्वमः ११ रामेणवननेवलेर्नियमनेपाण्डोः सुताना
वनेवसीनानियनेनलस्यत्स्यपतेगङ्गागमरिभ्रंशा।
नम् कारागारनिषेवणंवमरणंमेविन्मत्वेकेस्यरे
सर्वेःकालवशेननश्यतिनरःकोवापरित्रायते १२
भग्नाशस्यकरण्डपीडिततनोर्म्लानेन्द्रियस्यक्षुधा
कृत्वाखुर्विवरंस्वयंनिपतितोनक्तंमुखेभोगिनः
तृप्तस्तत्पिशितेनसत्वरमसौतेनैवयातःपथा लो
काःपश्यतदेवमेववहिन्द्वर्गांवृद्धौक्षयेकारणम् १३
मातापस्यपरायरेन्दूदुहितातातोमहेशस्तथाभ्रा।
ताविघ्नकृतान्तकःपितृसखोदेवोधनानांपतिः
स्यानःक्रौञ्चविदारणोस्त्ररपतेःसेनाग्रगःषण्मुखस्त
दुर्दैवबलेनकृच्छ्रवटतेनायापिपाणिग्रहः १४
कोश्चिन्नकूपयतिप्रपूरयतिवाकोश्चिन्नयत्नमाति
कोश्चिन्मानविधौकरोतिवशनःकोश्चिन्नयप्साकृला
न्प्रेम्णांमंप्रतिपद्यसेहृतिमिमांलोकस्थितिंवोधय
न्नेषक्रोडगतिकृपयत्नवटिकामायप्रसक्तोविधिः १५
तस्यभूभृतिजन्मतत्स्यगुभयोर्मूर्त्यंवतत्स्यंवशुस्त
स्पृहास्मिमुदग्रदृद्दलनेनतस्यैवपाषाणयोःपक
प्योःखलवन्दनायविधिनादेवत्वमारोपितेतद्धरे।
विहितापरस्मात्पराधानामदंदेहली १६

उड्डीय २ पार्वती ४ गजाननः ५ कुबेरः ६ विवाहः ७ पर्वते ८ हढता ९।

२ सभा १२९

यद्ग्रंथतन्त्रीमधुरस्वरस्य समेत्ययज्ञामदग्न्योजितस्य
क्रोधेन गौरीगिरिवसन्नमतोमितः पयोपयोक्तः पा
कैकेदृशा कन्यरत्नयक्तोरामस्य किंवर्ण्यते देवं
वर्णयेयनसोऽपिसहस्रानीतः कथाशेषताम् ९७
स्वलोदोदिवसेस्वरस्य किरणैः संतापितोमलके
वोब्लेशमनानयेनविधिनानालस्य मूलेगतः
तेनापस्य महाफलेन पतनाभग्नेस शंकोशिरः पा
योगच्छतियत्रभाग्यरहितस्तत्रापदोभाजनम् ९८
भूयिष्ठेरविणात्मनेजनयितुं लिस्रावलावेतसाना
यैः पंचमपाकमेणा ऋलजाः कालेसमुद्भाहिताः
सद्विद्याकविनाविशेशावसितैः सेवानवात्मयथेना
देवेनप्रतिवत्सकेन पुरायपद्मस्याः समस्ताः कृताः ५५
मनन्नममसियानमेकताशिवरंशाद्रंनयनाद्वेवा
णिस्पंक्ष्मिसेवनादिसकलाविद्याः कलाः शिक्षित
श्राकाशेमकलेप्रयातवगवत्कृत्वाप्रयत्नेपरेनो
भातव्यं भवतीहकर्मवशतोभाग्यस्यनाशः कृतः १०
तत्त्वीकोस्तभपारिजाततमहजः सन्नः स्वयाम्भोनि
धेर्देवनघणायप्रसादविधिना मूर्धोद्धृतः शंभुना
प्रयाणुस्मातिनेवदेवविहितेतैलेपतापावलम्भः के
नानेनविलंध्यतेविधिगतिः पाषाणरेखासखी १
प्रभोपिः स्यात्तनोस्यतेननलपितोधृलीलवः शैलतां
३ दृग्नायदेकाम्रेदलनम् १ दृविणां इव्यंतदेवात्मजः पुत्रस्तम् ११ विवाहि
ताः १२ निष्फलाः १३ पुदे

© Dharmartha Trust J&K. Digitized by eGangotri

मेरुः स्वर्णकणान्ततां तृणं कुलिशतो वज्रं रणप्रायताम्
वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया
लीलादुर्ललितादुतम्बमहिनिर्देवाय तस्मै नमः २
नन्मबलकुलेश्वरो धनपतिर्यः कुम्भकर्णाग्रजः
स्नुर्वासवनिर्जये दशशिरा दोर्दण्डकाविंशतिः
अस्त्रे कामगमं विमानमजयं मध्ये समुद्रं पुरी सर्वं
निष्फलमेन देवनियतं दैवं परं दुर्जयम् ३ यस्याब
णः स्वदन्तिदन्तमुसलास्फोटितामाहवे धाराय
श्रीपिनाकपाणिपरशो राकुण्ठितामागताः तन्मेतां
वद्दोल्लसिहकरजैर्योदीर्यते सो यतं देवं दुर्बलतां
गतेरणामपि यायेणावज्ञायते ४ दोःसंदोहवशंव
दत्रिभुवनश्रीगर्वसर्वंकषः कैलासोद्धरणप्रवणः
चरितो वीरः कुबेरानुजः यत्पायस्यमस्तिसेयमम
गावस्यापि वन्यापुरीनीतामकंटकेन कामपि दशां
यद्दैवमावपकम् ५ येनाकारि मृणालपत्रमश
नैःक्रीडाकरिणा सहस्रखण्डं भ्रमणं वकन्दरगतो
पीतेपयोनिर्झरम् सोऽयं दैवमपकरीनरेभपतितः ६
स्मातिदेहं त्रणायं दैवेन ललाटपत्रलिखितं तन्नो
ज्ज्वितेकः क्षमः ७ दैवेन प्रभुणा स्वयं जगति यद्यस्य
प्रमाणीकृतं तत्तस्योपनमेन्मनागपि महान्नैवाश्र
यः कारणम् सर्वाशापरिपूरके जलधरे वर्षत्यपि प्र
त्यहं सूक्ष्मा एव पतन्ति चातकमुखे द्विहाः पयोबिन्दवः

१ वज्रताम् २ इन्दुः ३ ऐरावतः ४

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
१३०

130

कान्तेव क्रिकपोलिकाऽऽकलनया नाथान्तकालोऽ्यु
नाथायोः पोष्टृत्तवापसज्जितशरः श्येनः परिभ्राम
ति १ यस्येममन्याहृतामदृष्टः भ्रुणः श्येनोऽपि तेनाहृत
स्तृणं तेनोत्तयमालयं प्रतिगतो देवो विविशगतिः
स्वास्रो वैहर्यमखोपवतितिलकणोऽस्तुन्दने रिच्य
नाथैः सौवर्णैर्नीहृलाघैर्निखनति वसुधां कर्मम्
तस्य हेतोः छिन्नाकर्षरवगमन्तिमिहृऊरुने को
रवाणां समन्तात्साप्यमो कर्मभूमिं नवरतिमन्त्र
नोपस्तेषामन्भाग्यः १ पैवेनपाणग्युग्राः क्षितिप
तिनयापमभीमानेनापाः श्रूराः समप्रतितादृ
क्तिवषुषः केशवेनापि गृध्राः नेवीराः पाणिपा
वेक्लपणजननगृहेभिन्नवर्णा प्रसूताः कोवाकार्ये स
मर्थो भवति विपिवशात्सावि नीकर्मरेखा ९ यत्र
प्रणामाक्वीनामपि चटकवधूचंचुकोटिच्युतानि
प्रोह्रीयन्ते स्ववेश्मस्वशनविरहितैर्नियं नेक्रोत्रिया
णाम् दैवदानर्थकस्मावृद्दलशिशुकराकृष्टहार
वल्लीनो भ्रष्टास्तैत्रवरूपाप्रवर्तितभिरललसेहृग्णिता
मौक्तिकौघाः ११

जरावर्णनम् ।

अलंकरोति द्विजराजमानान्यभिषपतीन् विड
म्बयति पल्लवस्त्रीमहृगायकमेवकान् १ त्वणात्य
वोयमायाति लेख्येतेनमसाधुनः निर्वास्यतः प्रदीप
स्याशोविवजरतोमतिः २

शिवः ५ रत्नविशेषः ८ प्राचीरम्

© Dharmartha Trust J&K. Digitized by eGangotri

शशिनीव हिमार्तानां घर्मार्तानां यथा रवौ मनो न
रमते स्त्रीणां जराजीर्णेन्द्रिये पतौ २ मलिनैरलकैर
नैः घनत्वं प्रकटीकृतम् नष्टोघादिव निर्यातावद
नाद्दन्तावलिः ४ वृद्धत्वानलदग्धस्य सारयौवन
वस्तुनः स्पष्टे देहगेहे भस्मेव वलितछलात् ५
दृश्यते पलितश्रेणिर्नैव वृद्धस्य मूर्धनि स्पैषवनात
नन्मेति किंतु भस्म विपिर्मेयात ९ इयतामपि साम
ग्रीं स्वकृतेन कृतेनवया ३ तीवकृपितो दन्तानलकं
पातयत्यलम् ९ यममिव करधृतदण्डं हरिमिव स
गदं शशाङ्कमिव वक्रम् शिवमिव च विरूपाक्षं जरा
करोत्यकृतपुण्यमपि ८ वदने दशनविहीने वाचो
न परिस्फुटा गलनाशक्तिः प्रयत्नेन्द्रियशक्तिः पुनर
पि वासंकृतं जरया ९ चूडरटति पलितहस्तो मस्त
कमासाद्य सर्वलोकस्य परिभवति जरा मृत्युकृ
रूपर्मा विरम पापेभ्यः १० शतमन्युं दर्पाधरकुबेर
मपि शूलिनं तथा गदिनम् कुरुते जरा नमाकिं कृपी
नोरूपनामकमनुजम् ११ क्रमवर्त्मनि श्मशानाय
पन्तौ जीवनेः पि जनयत्यनुरागम् ।

१ जरया जीर्णानि शिथिलानीन्द्रियाणि यस्य तस्मिन् २ केशैः ३ दन्तपंक्तिः ४ वार्ध
क्यं तदेवानलस्तेन दग्धस्य ५ पलितमिषेण ६ पंक्तिः ७ शुभ्रमेव ८ निर्दिश
वान् ९ कृपणम् १० यमः ११ गदया सहितम् पक्षे गदेन रोगेण सहितम् १२
विकृताक्षम् १३ दन्तरहितम् १४ पलितमेव हेतुः १५ इन्द्रम् पक्षे कोप
नम् १६ यमम् पक्षे यशस्थिरम् १७ धनाधिपम् पक्षे कुत्सितशरीरम्
१८ शिवम् पक्षे शूलयुक्तम् १९ विष्णुम् पक्षे गदयुक्तम् २० ग्रीवो पक्षे
क्रमस्य वर्त्ममार्गस्तस्मिन् २१

© Dharmartha Trust J&K. Digitized by eGangotri

र
सभा
१३१

131

आगतावतजेरेव हिमानीसेव्यतो स्वरतरंगवती
यम् २२ श्मशानस्य हन्तीजगत्कर्णमूले समागम्य व
कीति लोकाः श्मशानधाम यत्स्तीपर इव वाद्बोधन
धेभजधेरमानाथपादारविन्दम् २३ वर्णसिते शि
रसि वीक्ष्य शिरोरुहाणां स्थाने जरापरिभवस्य।
देवशुभ्रमाम् आरोपिताऽस्थिशकलं परिहृत्य यान्ति
वाग्जालरूपमिव हृद्वतरेन तृष्णाः २४ श्रान्तिः शिथि
लतां गता स्मृतिरपि ध्वस्ताधुना गतिर्विप्रमाग
ताविगलिता हिता नोन्नतिः गवामपि च संहृतिः स
द्भविनिक्रियानश्रुभुनाकृतानुजरयानयाकलितु
गस्य साधर्म्यता २५ गात्रे संकुचिते गतिर्विगलिता भ्र
ष्टा च दन्तावलिर्दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं
च लालायते वाक्यं नाद्रियते च बान्धवजनैर्भार्या न
शुश्रूषते हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रा
यते २६ स्थूलग्रावगणोऽतिजीर्णकथकः कासाऽऽक्रान्ता
लाविलो भग्नोरःकटिपृष्ठजानुजघनोत्सृष्योऽन्ति।
पीतारयेन श्रुगवन्मृष्टवपूर्वकाभिपन्नुवासंज्ञास
यन्तायमाना शापापाशानिव हृन्नीवविभवोत्सृष्टाः २७ ग्लायन्ति

उदके पत्ते आगते २२ हिमसंहतिः २३ स्वरते रंगवती पत्ते स्वर्गाणां तरङ्गवती भागीरथी २४ केशानाम् २५ आरोपितमस्थिनः शकलं यस्याः यस्मिन् २६ सुरसरपतादीति भावः २७ कर्णेन्द्रियम् पत्ते वेद २८ स्मरणाम् पत्ते मनोवाक्काम् २९ दन्तानाम् पत्ते ब्राह्मणानाम् ३० इन्द्रियाणाम् पत्ते धेनूनाम् ३१ समानधर्मत्वम् ३२ शत्रुवदाचरति ३३ अतिक्रान्तानि हस्तानि कम्पयतीति ३४ पार्श्वपुङ्कसोपवनानि ३५

© Dharmartha Trust J&K. Digitized by eGangotri

पादौ मे स्तम्भयन्ती गुरुमपि नमयन्त्युद्गमा ऊर्ध्वय
न्ती हृल्लासकम्पयन्ती प्रणयिजनवचो न श्रृणोतीः श्रा
वयन्ती रसाम्बुहृज्जयन्ती वलितनुमती नूतनोढा
जरा वा नव्यासा हृष्टवा नृशंस सप्ति वनपराभीतिहे
तनेरस्य १८

क्षया।

नास्ति क्षयासमं दुःखं नास्ति रोगः क्षयासमः नास्ति
हारसमं सौख्यं नास्ति कोपसमो रिपुः १ शय्यावस्त्र
धान्यं नेवाक्रहास्यं वीणावाणी हृष्यते यावनारी न
भ्राजन्ते वाप्यामानुरागाः सर्वारंभास्तलगुलाः य
स्यमूलाः २ आरोग्यविनाशिनी क्रशकरी कामांकु
रच्छेदिनी प्रशामित्रकलत्रभेदनकरी गर्वांकुरच्छे
दिनी कामं मन्दकरी तपःक्षयकरी धर्मस्य निर्मूल
नी सा मां मे प्रति सर्वरोगजननी धावण्यपद्मीक्षया ३

भित्तकः।

प्रतिदिनमपनत्सलमे भित्तकजननिसाधुजनन
कल्पलते त्वपनमननरंकतारिणि भगवतिभि
तेनमत्तम्भम् १ अग्न्याभुक्तिमतोप्रयोगसमुद्यम
न्नेषुष्टुष्णुगतः पाकागारगतस्तपाचकमनस्तोषा
यवाचस्पति ३ ब्रायोनिरतोरतोः भैकगणापिंडेषुद
नादयोनानाग्रास्कगणौकवात्तिनमनाभहोनमोगज
ते २

रेवदं प्राप्नोति १ पादयोः स्तम्भनं कुर्वती २ उद्वेगं कुर्वती ३ वलयः संज्ञा
ता यस्याः सा वलिता सा चासौ तनुश्चेति तवतीः पक्षे वलिते वलनं तनुष्ठा
या तद्वती ४ नवीनविवाहिता स्त्री ५ नूतनोढा ६ ७ कृपान ८ उद्वेगं प्राप्नो
ति ८ जरा ९ भयकारणाम् १० मन्दरम् ११ शत्रुः १२ अट्टहासम् १३ अग्रगण्यः १४
पोस्तृणाम् १५ बृहस्पतिः १६

© Dharmartha Trust J&K. Digitized by eGangotri

२
सभा
१२२

132

रुद्वैरध्ययनेऽप्यगाननकथास्त्रीभिः सहालापनेनासा
मर्भकलालनेपतिनुतिलभ्याकमिथ्यास्तुतिः
ग्रादेशस्यकरावलम्बनविधिः पाणिग्रस्येलेख
क्रियाहोरागारूढमन्त्रतन्त्रकविधिर्भिलोऽगुणाख्य
दशा २ यानःचालितलोचनाःकरतलेवेचम्रविश्रा
इ.करास्ततनस्थाननिवेशितार्धतिलकाश्चैतान्नव
हातनाःकोजातप्रभृतेःयवामस्तनातिथिःकस्मान
येवंस्पृहयन्तेऽगताःप्रतिदिनेयावन्नहोभिव
काः ४

परगृहवासः।

शिरसाधार्यमाणोःपिसोमःसोम्यनशंभुना तथा
पिकृशतांयतेकष्टःखलपराश्रयः १ विनाकार्ये
णायमृत्काशवान्तिपरमन्दिरम् प्रवेशंपलघुतां
यान्तिक्रमपदेयथाशशी २ कष्टंखलमूर्खत्वं
कष्टंखलयौवनेषुदारिद्र्यम् कष्टादपिकष्टतरं
परगृहवासःपवासेव ३ उदुगणपरिवारोनाय
कोःप्योषधीनाममृतमयशरीरःकान्तियुक्तोः
पिचन्द्रः भवतिविगतरश्मिर्मण्डलंप्राप्यभानोः
परसदननिविष्टःकोलघुत्वंनयाति ४

उदरपूरणाख्यानम्।

ग्रस्यदरपोदरस्यार्थेकिंनकुर्वन्तिपण्डिताः
